THE

DÛTAVÂKYA

OF

BHÂSA

With commentary

BY

Mahâmahopâdhyâya
PANDIT T. GANAPATI SÁSTRÎ
Honorary Member of the Royal Asiatic Society of Great Britain and Ireland ;
Honorary Doctor of Philosophy, University of Tubingen ;
Editor of the Trivandrum Sanskrit Series.

Trivandrum.
PRINTED AT THE SRIDHARA POWER PRESS.

मेहरचन्द लछमणदास
संस्कृत पुस्तकालय
1925
सैदमिट्ठा लाहौर

PREFACE.

This play is called Dûtavâkya owing to the importance attached to the advice given to Duryodhana by Srî-Krishna in his mission as an envoy of the Pândavas.

A palm-leaf manuscript obtained from Mr. Nîlakanthan Chakyar of Manganam has been consulted in this edition. Though much worn out, this manuscript yielded some correct and valuable readings and some additional passages in the text. To help the students, I have added a lucid and simple commentary.

TRIVANDRUM.

T. Ganapati Sâstrî.

निवेदना ।

पाण्डवदूतस्य कौरवपाण्डवसन्धिसंघटनेच्छोर्भगवतः श्रीकृष्णस्य सुयोधनहितोपदेशपरं वाक्यमिह रूपके प्रधानमिति कृत्वा दूतवाक्यमिदं व्यपदिश्यते ।

अस्यास्मिन् संस्करणे माङ्गानवासिश्रीनीलकण्ठचाक्यार्सकाशाधिगतं जीर्णत्रुटितानेकपत्रमादर्शान्तरमाश्रित्य शुद्धाश्च गुणवन्तश्चाधिकाश्च कतिपये पाठा योजिताः । ललितमनतिविस्तृतं व्याख्यानं च किञ्चिदस्माभिः प्रणीयात्र संश्लेषितं व्युत्पित्सूपकाराय ।

अनन्तशयनम् त. गणपतिशास्त्री

पात्राणि ।

काञ्चुकीयः — दुर्योधनभृत्यः ।

दुर्योधनः — धृतराष्ट्रस्य ज्येष्ठः पुत्रः ।

वासुदेवः — श्रीकृष्णः ।

सुदर्शनः — श्रीकृष्णचक्रायुधाभिमानी देवः ।

धृतराष्ट्रः — पाण्डोर्ज्येष्ठभ्राता ।

॥ श्रीः ॥

श्रीगणेशाय नमः ।

महाकविश्रीभासप्रणीतं

दूतवाक्यं

महामहोपाध्यायगणपतिशास्त्रिप्रणीतया व्याख्यया समेतम् ।

(नान्द्यन्ते ततः प्रविशति सूत्रधारः ।)

सूत्रधारः—

पादः पायादुपेन्द्रस्य सर्वलोकोत्सवः स वः ।
व्याविद्धो नमुचिर्येन तनुताम्रनखेन खे ॥ १ ॥

वन्देऽहं विघ्नराजं च वाग्देवीं च पुनःपुनः ।
पूर्यन्ते यत्कृपालेशान्मङ्क्षु नम्रमनोरथाः ॥
श्रीभासरूपकस्तोमे विचित्ररसयोगिनि ।
दूतवाक्याह्वयस्यार्थो रूपकस्य प्रकाश्यते ॥

अथ श्रीवाल्मीकिव्यासदेश्यस्तत्रभवान् श्रीभासः दूतवाक्यसंज्ञं रङ्गप्रयोगप्रधानं रूपकं चिकीर्षुस्तदारम्भे प्रयोगसम्यङ्निष्पत्त्यादिपरिपन्थिदुरितप्रशमौपयिकं पूर्वरङ्गप्रधानाङ्गं मङ्गलश्लोकपाठम् उपक्रम्यमाणप्रयोगस्य कथावस्त्वंशस्य निवेदनं च प्रयोगनिर्वाहधुरन्धरेण सूत्रधारेण रङ्गे प्रथमसमाचरणीयं पश्यन् सूत्रधारस्य प्रवेशं तावदाह—नान्द्यन्ते ततः प्रविशति सूत्रधार इति । नन्दिरानन्दः, तस्या इयं नान्दी, आनन्दजनयित्री गीतवाद्यवादनादिरूपा क्रिया, तस्या अन्ते अवसाने । सा हि प्रयोगारम्भात् प्राग् देवतापरिषदानन्दार्थानुष्ठीयते । यद्यप्युक्तव्युत्पत्त्या देवस्तावकमङ्गलश्लोकपाठोऽपि नान्दी भवति, तथापि सा श्लोकनान्दी सत्काव्यरूपत्वाद् रङ्गप्रयोगयोग्या रङ्ग एव प्रयोक्ष्यत इति तदतिरिक्तैव नान्दीह ग्राह्या । ततः तदनन्तरं गीतवाद्यवादनादिक्रियापरिसमाप्त्यव्यवहितोत्तरकाले इत्यर्थः । सूत्रधारः सूत्रं प्रयोगानुष्ठानं धारयति निर्वाहयतीति सूत्रधारः । प्रविशति अर्थाद् रङ्गम् ॥

प्रविष्टः सूत्रधारो मङ्गलश्लोकं पठति—पाद इति । सर्वलोकोत्सवः सर्वेषां लोकानां जगताम् उत्सवः हर्षहेतुः । उपेन्द्रस्य इन्द्रानुजस्य वामनस्य । स पादः

एवमार्यमिश्रान् विज्ञापयामि । अये किन्नुखलु मयि विज्ञापनव्यग्रे शब्द इव श्रूयते । अङ्ग ! पश्यामि ।

(नेपथ्ये)

भो भोः प्रतिहाराधिकृताः ! महाराजो दुर्योधनः समाज्ञापयति ।

चरणः । वः सामाजिकान् । पायाद् रक्षतात् । प्रयोगप्रेक्षणरूपाभिलषितार्थनिर्विघ्नसिद्धया योजयतादित्यर्थः । सर्वलोकोत्सवत्वानुगुणं परमाद्भुतं तस्यापदानमाह,— तनुताम्रनखेन तनवः अल्पाकृतयः ताम्रा अरुणाश्च नखा यस्य तेन तथाभूतेन । एतेन बालभावानुत्तीर्णत्वमुक्तम् । येन पादेन । नमुचिः तन्नामा बलिबन्धुः असुरः । खे आकाशे, व्याविद्धः क्षिप्तः । नमुचिव्यावेधनकथा पुराणेष्वनुसन्धेया । इन्द्रेण तु नमुचिर्नामासुरः समुद्रफेनेन निहतः । एतच्च मङ्गलं तन्त्रेण ग्रन्थविघ्नविघाताद्यर्थमपि भवतीति सर्वविधमङ्गलसिद्धिः ॥

अत्र पाण्डवदूतस्य भगवतः श्रावितपाण्डवसन्देशस्य प्रयातुमिच्छोर्मोचनमननुमन्यमानः प्रत्युत बन्धनाय सन्नह्यन् आसुरप्रकृतिर्दुर्योधनो नमुचिपदेनावयवशक्त्या मोचनप्रतिषेधं बोधयता सूचितः; नमुचिव्यावेधनलक्षणस्य चापदानाद्भुतस्य कथनेन परमाद्भुतविश्वरूपप्रदर्शननिमित्तो दुर्योधननिग्रहो भगवत्कृतो ग्रन्थप्रतिपाद्यो द्योतितः । अत्रार्धान्ते पुनरुक्तवदाभासौ शब्दालङ्कारौ बोद्धव्यौ ॥ १ ॥

इत्थं मङ्गलपाठसम्मुखीकृतान् सामाजिकान् प्रति उपक्रंस्यमानस्य कथावस्त्वंशस्य विज्ञापनं प्रतिजानीते—एवमार्यमिश्रानित्यादि । एवम् अनेन बुद्धिस्थेन प्रकारेण । आर्यमिश्रान् पूज्यतमान् । विज्ञापनप्रतिज्ञया सूत्रधारस्येङ्गितं गृहीत्वा तद्वर्ग्यैर्विज्ञाप्यवस्तुप्रयोगोपक्रमसूचकः शब्दो नेपथ्ये समुत्थापितः । सूत्रधारस्तु अस्यार्थस्याज्ञानाभिनयचमत्कारेण तटस्थ इव तं शब्दं गृह्णन्नाह — अये इत्यादि । अये इति विषादे कोपे वा । स च शब्दे विज्ञापनविघ्नत्वबुद्धयभिनयात् । किन्नुखलु किं कारणम् । मयि विज्ञापनव्यग्रे सति विज्ञापनव्यासक्तमात्रे सति । शब्द इव विशेषाकारेणानिश्चितः शब्दः, इवपदस्यानिश्चयार्थत्वात् । पश्यामि शब्दस्य विशेषाकारं निमित्तं च परीक्ष्य ज्ञास्यामि । अङ्गेति दर्शनविषयं सम्भ्रमं सूचयति ॥

शब्दस्य विशेषाकारानिश्चयाय श्रवणापेक्षायां तस्य नेपथ्ये प्रवृत्तिं कविः स्ववाक्येन सूचयति—नेपथ्य इति । वक्ष्यमाणाकारः शब्दो नेपथ्ये प्रवृत्त इत्यर्थः । शब्दस्याकारमाह—भो भो इत्यादि ॥

सूत्रधारः — भवतु, विज्ञातम् ।

उत्पन्ने धार्तराष्ट्राणां विरोधे पाण्डवैः सह ।
मन्त्रशालां रचयति भृत्यो दुर्योधनाज्ञया ॥ २ ॥

(निष्क्रान्तः ।)

स्थापना ।

(ततः प्रविशति काञ्चुकीयः ।)

काञ्चुकीयः — भो भोः प्रतिहाराधिकृताः! महाराजो दुर्योधनः समाज्ञापयति — अद्य सर्वपार्थिवैः सह मन्त्रयितुमिच्छामि । तदाहूयन्तां

भवत्विति । भवतु शब्दस्य भवनं प्राप्तावसरं, लोटः प्राप्तकालार्थत्वात् । प्राप्तावसरत्वोक्त्या च शब्दस्य विज्ञाप्यवस्तुसम्बद्धत्वं प्रत्यायितम्। विज्ञातम् अवगतम् अर्थाच्छब्दस्य निमित्तम् ॥

तदेव विवृणोति—**उत्पन्न** इति । धार्तराष्ट्राणां धृतराष्ट्रपुत्राणां सुयोधनादीनाम् । पाण्डवैः सह पाण्डुपुत्रैर्युधिष्ठिरादिभिः सह विरोधे वैरे। उत्पन्ने सति, दुर्योधनाज्ञया दुर्योधनस्य चोदनया । भृत्यः अर्थाद् दुर्योधनस्य । **मन्त्रशालां** कार्यसम्मन्त्रणार्थां सभाम् । रचयति योजयति, मन्त्रसभायोगानुकूलमाचरतीत्यर्थः । तच्च मन्त्रसभासमवायार्हपार्थिवाह्वानाय प्रतिहाराधिकृतानां प्रेरणम् । एतन्निमित्तमेव शब्दस्योत्थानमिति तात्पर्यम् ॥ २ ॥

विज्ञाप्यविज्ञापनं नेपथ्योत्थशब्दविवरणभङ्ग्या निर्वृत्तं मन्वानस्य सूत्रधारस्य निष्क्रमणमाह—**निष्क्रान्त** इति । **स्थापनेति** । एवं कथावस्त्वंशस्य स्थापनात् स्थापना । क्वचित् प्रस्तावनेति पाठः । स्थापना प्रस्तावनेति पर्यायौ ॥

स्थापनायां कविकाव्यनामानुत्कीर्तनं तदुत्कीर्तनसमुदाचारप्रवृत्तिकालादस्य रूपकस्य प्राचीनत्वं गमयति । अस्य नामधेयं दूतवाक्यमिति, 'दूतवाक्यं समाप्तम्' इति ग्रन्थान्ते लेखनात् । अस्य प्रणेता पुनः श्रीभास इति **स्वप्नवासवदत्तोपोद्घाते** न्यरूपयाम ॥

सूचितस्य भृत्यस्य प्रवेशमाह—**तत** इत्यादि । **भो भो** इत्यादि । **प्रतिहाराधिकृताः** प्रतिहारो द्वारं तस्मिन्नधिकृताः, तत्र स्थित्वा राज्ञ आज्ञां ये भृत्याः

सर्वे राजान इति । (परिक्रम्यावलोक्य) अये अयं महाराजो दुर्योधन इत एवाभिवर्तते । य एषः,

श्यामो युवा सितदुकूलकृतोत्तरीयः सच्छत्रचामरवरो रचिताङ्गरागः ।
श्रीमान् विभूषणमणिद्युतिरञ्जिताङ्गो नक्षत्रमध्य इव पर्वगतः शशाङ्कः ॥ ३ ॥

(ततः प्रविशति यथानिर्दिष्टो दुर्योधनः ।)

दुर्योधनः—

उद्धूतरोषमिव मे हृदयं सहर्षं प्राप्तं रणोत्सवमिमं सहसा विचिन्त्य ।
इच्छामि पाण्डवबले वरवारणानामुत्कृत्तदन्तमुसलानि मुखानि कर्तुम् ॥ ४ ॥

प्रतिपालयन्ति ते । सर्वपार्थिवैः सह सर्वैः पार्थिवैः पृथिव्या ईश्वरैः साकम् । मन्त्रयितुम् आलोचयितुम् । आलोचनं चैकादशाक्षौहिणीबलसमुदयस्य पाण्डवयुद्धार्थं संगृहीतस्य सेनापतिनिर्धारणविषयं स्पष्टीभविष्यति । अभिवर्तते अभिमुखमागच्छति ।

श्याम इति । श्यामः कृष्णवर्णः । युवा, सितेन धवलेन दुकूलेन क्षौमेण सूक्ष्मवस्त्रेण वा कृतम् उत्तरीयं येन सः सितदुकूलकृतोत्तरीयः । रचितः अङ्गरागः अङ्गानुलेपनं येन सः रचिताङ्गरागः । विभूषणमणिद्युतिभिः आभरणरत्नकान्तिभिः रञ्जितानि रूषितानि अङ्गानि यस्य सः विभूषणमणिद्युतिरञ्जिताङ्गः । य एषः । धवलदुकूलच्छत्रचामरादिमध्यवर्तिनो राज्ञ उपमामाह—नक्षत्रमध्ये, स्थित इति शेषः । पर्वगतः पूर्णिमां प्राप्तः । शशाङ्क इव चन्द्र इव प्रियदर्शनत्वात् । शोभत इति शेषः "दुकूलं तु क्षौमेऽन्ये सूक्ष्मवाससि" इति केशवस्वामी ॥ ३ ॥

उद्धूतेति । मे, हृदयम्, इमं बुद्धिस्थं चिरमनोरथपथपरिशीलितमित्यर्थः । रणोत्सवं युद्धमेवानन्दहेतुत्वाद् उत्सवम् । सहसा अचिरेण, प्राप्तम् । विचिन्त्य, उद्धूतरोषमिव उद्धूतः निरस्तो रोषः कोपः पाण्डवविषयो येन तत् तथाभूतमिव । इवेति संभावनायाम् । तेन रोषस्य सतोऽप्युद्धूतवदवभासमानतोक्ता । सा च चित्तवृत्त्यन्तरेणाभिभवादित्याशयवानाह — सहर्षं हर्षयुक्तं, भवति । एवंच रोषस्यकारेण हर्ष उदित इति तात्पर्यम् । कथं युद्धप्राप्तिचिन्तया हर्षोदयस्तत्राह—पाण्डवबले पाण्डवानां सैन्ये । वरवारणानां प्रशस्तगजानाम् । मुखानि, उत्कृत्तदन्तमुसलानि उत्कृत्ताः छिन्नाः दन्तमुसलाः दन्ता मुसला इव येषु तानि तथाभूतानि ।

काञ्चुकीयः — जयतु महाराजः । महाराजशासनात् समानीतं सर्व-राजमण्डलम् ।

दुर्योधनः — सम्यक् कृतम् । प्रविश त्वमवरोधनम् ।

काञ्चुकीयः — यदाज्ञापयति महाराजः । (निष्क्रान्तः ।)

दुर्योधनः — आर्यौ ! वैकर्णवर्षदेवौ ! उच्यताम् — अस्ति ममैकादशाक्षौहिणीबलसमुदयः । अस्य कः सेनापतिर्भवितुमर्हतीति ।

किमाहतुर्भवन्तौ — महान् खल्वयमर्थः । मन्त्रयित्वा वक्तव्यमिति ।

सदृशमेतत् । तदागम्यतां मन्त्रशालामेव प्रविशामः । आचार्य ! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । पितामह ! अभिवादये । प्रविशतु भवान् मन्त्रशालाम् । आर्यौ ! वैकर्णवर्षदेवौ ! प्रविशतां भवन्तौ ।

कर्तुम्, इच्छामि । एवञ्च इच्छायाः फलप्राप्तिकालः प्रत्यासन्नो युद्धस्यासन्नत्वादिति निश्चयो हर्षोदये कारणमित्युक्तं भवति । 'इच्छा हि' इति क्वचित् पाठः । तदा हिशब्दो हेतौ, यस्मात् कारणादित्यर्थः । इच्छा कामः । समास्तीत्यर्थगम्यम् ॥ ४ ॥

सम्यगित्यादि । अवरोधनम् अन्तःपुरम् ॥

आर्यावित्यादि । वैकर्णवर्षदेवौ राजविशेषौ । वैकर्तनवर्षदेवाविति क्वचित् पाठः । एकादशाक्षौहिणीबलसमुदयः एकादश या अक्षौहिण्यः सेनापरिमाणविशेषाः ता एव बलानि सैन्यानि तेषां समुदयः सङ्घातः । "त्रिहयं पञ्चपादातं मधेकरथकुञ्जरम् । सैन्यं सा पत्तिरेतस्यास्त्रैगुण्यात् स्युर्यथाक्रमम् । सेनामुखं गुल्मगणौ वाहिनी पृतना चमूः । अनीकिनीत्यनीकिन्यः पुनरक्षौहिणी दश ।" इति वैजयन्ती । किमाहतुरित्यादि । एतच्च पृष्टयोः रङ्गमप्रविष्टयोः प्रतिवचनस्यानुवादभङ्ग्या प्रकाशनम् । इदमाकाशभाषितमित्युच्यते । यदाह धनिकः — "किं ब्रवीष्येवमित्यादि विना पात्रं ब्रवीति यत् । श्रुत्वेवानुक्तमप्येकस्तत् स्यादाकाशभाषितम् ॥" इति ।

सदृशं युक्तम् । आहूतागतान् द्रोणभीष्मादीन् प्रति सत्कारवाक्यानि 'तदागम्यतामि'त्यादीनि । कूर्मासनं कूर्माकाराङ्कितम् आसनम् । स्वैरं निश्शङ्कम् । आश्रितुं शङ्कमानानिव सर्वक्षत्रियान् पश्यन् पृच्छति — किमिति किमिति कुतः

भो भोः सर्वक्षत्रियाः! स्वैरं प्रविशन्तु भवन्तः । वयस्य! कर्ण! प्रविशावस्तावत् ।

(प्रविश्य)

आचार्य! एतत् कूर्मासनम्, आस्यताम् । पितामह! एतत् सिंहासनम्, आस्यताम् । मातुल! एतच्चर्मासनम्, आस्यताम् । आर्यौ! वैकर्णवर्षदेवौ! आसातां भवन्तौ । भो भोः सर्वक्षत्रियाः! स्वैरमासतां भवन्तः ।

किमिति किमिति । महाराजो नास्त इति । अहो सेवाधर्मः । नन्वयमहमासे । वयस्य! कर्ण! त्वमप्यास्स्व । (उपविश्य)

आर्यौ! वैकर्णवर्षदेवौ! उच्यताम् — अस्ति ममैकादशाक्षौहिणीबलसमुदयः । अस्य कः सेनापतिर्भवितुमर्हतीति ।

किमाहतुर्भवन्तौ — अत्रभवान् गान्धारराजो वक्ष्यतीति । भवतु, मातुलेनाभिधीयताम् ।

किमाह मातुलः — अत्रभवति गाङ्गेये स्थिते कोऽन्यः सेनापतिर्भवितुमर्हतीति ।

सम्यगाह मातुलः । भवतु भवतु । पितामह एव भवतु । वयमप्येतदभिलषामः ।

कुतः । शङ्कन्त इति क्रियाध्याहारः । तैरुक्तं शङ्काहेतुमनुवादभङ्ग्या प्रकाशयति— महाराज इत्यादि । अत्र इतिशब्दानन्तरं 'किं ब्रूथे'ति शेषः । सेवाधर्मः सेव्यानुरोधसमुदाचारः अनुपविष्टे सेव्ये अनुपवेशलक्षणः । नन्विति अनुनये । वयस्य! हे सखे! ।

अत्रेत्यादि । अत्रभवान् पूज्यः । गान्धाराणां राजा गान्धारराजः शकुनिः । 'राजाहस्सखिभ्यष्टच्' इति समासान्तः ।

अत्रभवतीत्यादि । गाङ्गेये गङ्गाया अपत्यं पुमान् गाङ्गेयः भीष्मः तस्मिन् । वयमपीत्यादिस्थाने 'अहमप्येतदभिलषामीति' क्वचित् पाठः ।

सेनानिनादपटहस्वनशङ्खनादैश्चण्डानिलाहतमहोदधिनादकल्पैः ।
गाङ्गेयमूर्ध्नि पतितैरभिषेकतोयैः सार्धं पतन्तु हृदयानि नराधिपानाम् ॥ ५ ॥

(प्रविश्य)

काञ्चुकीयः—जयतु महाराजः । एष खलु पाण्डवस्कन्धावाराद् दौत्येनागतः पुरुषोत्तमो नारायणः ।

दुर्योधनः—मा तावद् भो बादरायण! । किं किं कंसभृत्यो दामोदरस्तव पुरुषोत्तमः । स गोपालकस्तव पुरुषोत्तमः । बार्हद्रथापहृतविषयकीर्तिभोगस्तव पुरुषोत्तमः । अहो पार्थिवासन्नमाश्रितस्य भृत्यजनस्य समुदाचारः । सगर्वं खल्वस्य वचनम् । आ अपध्वंस ।

सेनेति । चण्डानिलाहतमहोदधिनादकल्पैः चण्डमारुतोल्लोलितसमुद्रध्वनिसदृशैः । सेनानिनादपटहस्वनशङ्खनादैः सेनानिनादः सैन्यसिंहनादश्च पटहस्वनश्च शङ्खनादश्चेत्येतैः सैनापत्याभिषेकमङ्गलाङ्गैः । उपलक्षितैरिति शेषः । गाङ्गेयमूर्ध्नि भीष्मशिरसि । पतितैः; अभिषेकतोयैः साकं सैनापत्याभिषेकजलैः सह । नराधिपानां शत्रुनृपाणां हृदयानि, पतन्तु, पतनं च तोयपक्षे मूर्धाधोदेशप्राप्तिः, हृदयपक्षे धैर्यच्युतिः । सहोक्तिरलङ्कारः ॥ ५ ॥

जयत्वित्यादि । पाण्डवस्कन्धावारात् पाण्डवशिबिरात् । दौत्येन दूतभावेन । पुरुषोत्तमः पुरुषेषु मध्ये उत्तमः । नारायणः श्रीकृष्णः ॥

श्रीकृष्णस्य पुरुषोत्तमत्वविशेषणं निसर्गद्वेषित्वादसहमान आह—मेत्यादि । मा तावदिति प्रतिषेधोऽनिष्टवचनविषयः । किंशब्द आक्षेपे, कोपाद् द्विरुक्तिः । आक्षेप्यं तु पुरुषोत्तमत्वम् । तच्च विरुद्धधर्मोद्भावनया त्रिः खण्डयति 'कंसभृत्य' इत्यादिना । कंसभृत्यः कंसस्य सेवकः । दामोदरः दाम रज्जुः उदरे यस्य निबद्धं चौर्यनिवारणाय जनन्या स तथाभूतः । आभ्यां विशेषणाभ्यां नीचवृत्तित्वम् आबालदुश्शीलत्वं चोक्तम् । तव पुरुषोत्तमः त्वत्पक्षे पुरुषोत्तमः । नीचवृत्तिं दुश्शीलं च जनं त्वं पुरुषोत्तमं मन्यसे, धिक् त्वामित्यभिप्रायः । गोपालकः आभीरः । अनेन कुलहीनता सूचिता । बार्हद्रथापहृतविषयकीर्तिभोगः बार्हद्रथेन जरासन्धेन अपहृतः विषयो देशः कीर्तिर्भोगश्च यस्य स तथा । एतेन शौर्यहीनतोक्ता । पार्थिवासन्नम् आश्रितस्य राजान्तिकं सेवमानस्य । समुदाचारः व्यवहारक्रमः । आः कोपे । अपध्वंस नष्टो भव, मदन्तिकात् सहसापसरेत्यर्थः । अनुदात्तेत्त्वलक्षणस्यात्मनेपदस्यानित्यत्वात् परस्मैपदम् ॥

काञ्चुकीयः — प्रसीदतु प्रसीदतु महाराजः । संभ्रमेण समुदाचारो विस्मृतः । (पादयोः पतति ।)

दुर्योधनः — संभ्रम इति । आ मनुष्याणामस्त्येव संभ्रमः । उत्तिष्ठोत्तिष्ठ ।

काञ्चुकीयः — अनुगृहीतोऽस्मि ।

दुर्योधनः — इदानीं प्रसन्नोऽस्मि । क एष दूतः प्राप्तः ।

काञ्चुकीयः — दूतः प्राप्तः केशवः ।

दुर्योधनः — केशव इति । एवमेष्टव्यम् । अयमेव समुदाचारः । भो भो राजानः! दौत्येनागतस्य केशवस्य किं युक्तम् । किमाहुर्भवन्तः — अर्घ्यप्रदानेन पूजयितव्यः केशव इति । न मे रोचते । ग्रहणमस्यात्र हितं पश्यामि ।

ग्रहणमुपगते तु वासुभद्रे हृतनयना इव पाण्डवा भवेयुः ।
गतिमतिरहितेषु पाण्डवेषु क्षितिरखिलापि भवेन्ममासपत्ना ॥ ६ ॥

प्रसीदत्वित्यादि । संभ्रमेण त्वरया ।

सम्भ्रम इत्यादि । आ इति स्मरणे । अमनुष्याणमिति पाठे मनुष्याभासानामित्यर्थः ॥

इदानीमित्यादि । क एष इति प्रश्नो न्याय्यं समुदाचारं भाषयितुम् ॥

केशव इति । एवम् एष्टव्यं निर्विशेषणनामधेयमात्रग्रहणलक्षणः एष प्रकार एषितुमर्ह इत्यर्थः । किं युक्तं कीदृशं सम्भावनमनुरूपम् । अर्घ्यप्रदानेन अर्घाय पूजायै हितम् अर्घ्यं तस्य प्रदानेन । न रोचते अर्थात् पूजनम् । ग्रहणं बन्दीकरणम् ।

ग्रहणस्य हितत्वमुपपादयति — ग्रहणमिति । वासुभद्रे कृष्णे । वासुदेवनामैकदेशस्य वासुशब्दस्य सौम्यार्थकभद्रपदयुक्तस्यायं प्रयोगो रामभद्रवत् । ग्रहणं बन्दीकरणम् । उपगते प्राप्ते सति । पाण्डवाः, हृतनयना इव नेत्रहीना इव । भवेयुः । वासुदेवेन हि नयनस्थानीयेन ते कार्याणि सम्यक् पश्यन्तस्तद्विरहे कार्यदर्शनाक्षमा भवेयुरित्यभिप्रायः । पाण्डवेषु, गतिमतिरहितेषु गत्या शरणेन कृष्णात्मना मत्या कृष्णदीयमानया बुद्ध्या च रहितेषु सत्सु । अखिलापि समस्तापि ।

अपिच योऽत्र केशवस्य प्रत्युत्थास्यति, स मया द्वादशसुवर्णभारेण दण्ड्यः । तदप्रमत्ता भवन्तु भवन्तः । (आत्मगतम्) कोनुखलु इदानीं ममाप्रत्युत्थानस्योपायः । हन्त दृष्ट उपायः । (प्रकाशम्) बादरायण! आनीयतां स चित्रपटो ननु, यत्र द्रौपदीकेशाम्बराकर्षणमालिखितम् । (आत्मगतम्) तस्मिन् दृष्टिविन्यासं कुर्वन् नोत्थास्यामि केशवस्य ।

काञ्चुकीयः—यदाज्ञापयति महाराजः । (निष्क्रम्य प्रविश्य) जयतु महाराजः । अयं स चित्रपटः ।

दुर्योधनः—समाग्रतः प्रसारय ।

काञ्चुकीयः—यदाज्ञापयति महाराजः । (प्रसारयति ।)

दुर्योधनः—अहो दर्शनीयोऽयं चित्रपटः । एष दुःशासनो द्रौपदीं केशहस्ते गृहीतवान् । एषा खलु द्रौपदी,

दुःशासनपरामृष्टा सम्भ्रमोत्फुल्ललोचना ।

क्षितिः भूमिः । असपत्ना निश्शत्रुः सती, भागार्थिनां शत्रूणामसहायतया युद्धेऽनुद्योगात् प्राणपरित्यागाद् वेति भावः । मम भवेत् ममैव भवेत् मदेकस्वामिका भवेत ॥ ६ ॥

प्रत्युत्थानमात्रेणापि कृष्णं सम्भावयितुर्दण्डमादिशति—अपिचेत्यादि । अत्र सभास्तारेषु मध्ये । प्रत्युत्थास्यति प्रत्युत्थानसमुदाचारमनुष्ठास्यति । द्वादशसुवर्णभारेण, सुवर्णः कर्षः, द्वादशकर्षात्मको नाणकविशेषो द्वादशसुवर्ण इति व्यपदिष्टः, द्वादशसुवर्णानां भारः पलसहस्रद्वयं द्वादशसुवर्णभारः, तेन । 'सुवर्णो ना स्वर्णकर्षे' इति मेदिनी । 'भारः सहस्रद्वितये पलानां च गरिम्णि च' इति यादवः । महतो दण्डस्य विधानं प्रत्युत्थानस्य महापराधत्वबोधनार्थम् । प्रत्युत्थातुः परस्य विहितदण्डोऽपि कृष्णसम्मुखदर्शने अप्रत्युत्थानमात्मना कर्तुमशक्यं मन्यमानश्चिन्तयति—कोन्वित्यादि । चित्रपटः आलेख्यपटः । नन्विति सम्भ्रमे । तस्मिन्नित्यादि । तस्मिन् चित्रपटे । एवञ्च कृष्णादर्शनच्छद्मना प्रत्युत्थानं परिहरिष्यामीत्यभिप्रायः ॥

समेत्यादि । प्रसारय विस्तारय अर्थाच्चित्रपटम् ॥

अहो इत्यादि । एष आलिखितः । दुश्शासनः, केशहस्ते कचकलापे ।

दुश्शासनेत्यादि । दुश्शासनपरामृष्टा दुश्शासनकरगता । संभ्रमोत्फुल्ललो-

राहुवक्त्रान्तरगता चन्द्रलेखेव शोभते ॥ ७ ॥

एष दुरात्मा भीमः सर्वराजसमक्षमवमानितां द्रौपदीं दृष्ट्वा प्रवृद्धामर्षः सभास्तम्भं तुलयति । एष युधिष्ठिरः,

सत्यधर्मघृणायुक्तो द्यूतविभ्रष्टचेतनः ।
करोत्यपाङ्गविक्षेपैः शान्तामर्षं वृकोदरम् ॥ ८ ॥

एष इदानीमर्जुनः,

रोषाकुलाक्षः स्फुरिताधरोष्ठस्तृणाय मत्वा रिपुमण्डलं तत् ।
उत्सादयिष्यन्निव सर्वराज्ञः शनैः समाकर्षति गाण्डिवज्याम् ॥ ९ ॥

एष युधिष्ठिरोऽर्जुनं निवारयति । एतौ नकुलसहदेवौ,

कृतपरिकरबन्धौ चर्मनिस्त्रिंशहस्तौ परुषितमुखरागौ स्पष्टदष्टाधरोष्ठौ ।
विगतमरणशङ्कौ सत्वरं भ्रातरं मे हरिमिव मृगपोतौ तेजसाभिप्रयातौ ॥

चना सम्भ्रमेण संवेगेन उत्फुल्ले अतिविकसित लोचने यस्याः सा ॥ ७ ॥

एष इत्यादि । भीमः भीमसेनः । सर्वराजसमक्षं सर्वराजानां सर्वेषां राज्ञां प्रत्यक्षं यथा भवति तथा । प्रवृद्धामर्षः संवृद्धकोपः । तुलयति चलयति । यद्वा उन्मिमीते । उन्मानमिह तारतम्यपरीक्षणं, किमनेन स्तम्भेन शत्रून् प्रहरेयं किममुना स्तम्भेनेति तत्सारफल्गुतां दृष्ट्या पर्यालोचयतीत्यर्थः । युधिष्ठिरः धर्मसूनुः ।

सत्येत्यादि । घृणा अकार्यविषया जुगुप्सा । 'घृणा जुगुप्साकृपयोः' इति मेदिनी । द्यूतविभ्रष्टचेतनः द्यूतेन अक्षक्रीडया तन्निमित्तपराजयेनेत्यर्थः विभ्रष्टा नष्टा चेतना संविद् यस्य सः । अपाङ्गविक्षेपैः सेङ्गितैः कटाक्षावलोकनैः । वृकोदरं भीमम् ॥ ८ ॥

रोषेत्यादि । तृणाय मत्वा तृणं मत्वा तृणमिवानादृत्येत्यर्थः 'मन्यकर्मण्यनादरे' इति चतुर्थी । सर्वराज्ञः सर्वान् द्रौपदीपरिभवस्य कर्तॄन् अनुमन्तॄन् द्रष्टॄंश्च नृपान् । 'राजाहस्सखिभ्य' इति समासान्तस्याकरणमनित्यत्वात् । 'सर्वराजान्' इत्येव क्वचित् पाठः । उत्सादयिष्यन्निव ध्वंसयिष्यन्निव । 'लटः सद्वा' इति लटः शत्रादेशः प्रकृत्यर्थस्य समाकर्षणक्रियां प्रति फलत्वविवक्षया । गाण्डिवज्यां गाण्डिवाख्यस्य चापस्य मौर्वीम् ॥ ९ ॥

एष इत्यादि । निवारयति अर्थाद् युद्धोद्यमात् ।

कृतेत्यादि । कृतः परिकरबन्धः प्रगाढगात्रबन्धः याभ्यां तौ । चर्मनिस्त्रिं-

एष युधिष्ठरः कुमारावुपेत्य निवारयति—

नीचोऽहमेव विपरीतमतिः कथं वा रोषं परित्यजतमद्य नयानयज्ञौ ।
द्यूताधिकारमवमानममृष्यमाणाः सत्त्वाधिकेषु वचनीयपराक्रमाः स्युः ॥११॥

इति । एष गान्धारराजः,

अक्षान् क्षिपन् स कितवः प्रहसन् सगर्वं सङ्कोचयन्निव मुदं द्विषतां स्वकीर्त्या ।
स्वैरासनो द्रुपदराजसुतां रुदन्तीं काक्षेण पश्यति लिखत्यपि गां नखाग्रैः ॥

शस्त्रौ चर्मनिस्त्रिंशौ फलकखड्गौ हस्तयोर्ययोस्तौ । परुषितमुखरागौ परुषितः परुषो रूक्षः कृतः मुखरागो मुखप्रकाशो ययोस्तौ । एतेन सकोपत्वमुक्तम् । मे भ्रातरं दुश्शासनम् । हरिमिव सिंहमिव । मृगपोतौ हरिणडिम्भौ । तेजसा वीर्येण । अभिप्रयातौ प्रत्यवस्थितौ । मृगपोतोपमया नकुलसहदेवयोरभियानस्योपहास्यत्वं द्योतितम् ॥ १० ॥

नकुलसहदेवौ निवारयता धर्मजेन सभायां पुरा यदुक्तं वाक्यं, तत् प्रकृतानुगुण्यात् स्मरति—नीच इति । अहमेव, नीचः अधमः । भवामीति शेषः । वाशब्दोऽन्यथाशब्दार्थे, नीचत्वाभावे इत्यर्थः । कथं केन हेतुना । विपरीतमतिः विपरीता आत्मयोगक्षेमप्रतिकूला मतिः द्यूतगोचरा यस्य स तथाभूतः । भवेयमित्यार्थम् । अद्य इदानीं द्यूतपराजितसमुदाचारानुष्ठानयोग्येऽस्मिन् समये इत्यर्थः । नयानयज्ञौ द्यूतनीत्यनीतिवेदिनौ । युवां, रोषं परित्यजतं, द्यूतविजितैर्नामेदृशः परिभवः सोढव्य एव, न तु पराक्रमेण सद्यः प्रतिकर्तुं योग्य इति भावः । पराक्रमणे को दोषस्तत्राह— द्यूताधिकारं द्यूतेन अधिक्रियते प्रस्तूयत इति द्यूताधिकारः । तं द्यूतनिमित्तकमित्यर्थः । अवमानम्, अमृष्यमाणाः असहमानाः, अर्थाद् विक्रमेण प्रतिकर्तुं सद्यो व्यवस्यन्तः पुरुषा । सत्त्वाधिकेषु सत्त्वं पराक्रमः तेनाधिकेषु महापराक्रमशालिषु मध्ये । वचनीयपराक्रमाः वचनीयः अकालप्रयोगान्निन्द्यः पराक्रमः विक्रमो येषां ते तथोक्ताः स्युः ॥ ११ ॥

अक्षानित्यादि । अक्षान् पाशकान् । कितवः अक्षदेवी । स्वकीर्त्या आत्मयशसा अक्षदेवननैपुण्यजन्मना । स्वैरासनः स्वैरं स्वच्छन्दम् अगणितगुरुजनसान्निध्यम् आसनम् उपवेशप्रकारो यस्य सः । रुदन्तीम् अश्रु मुञ्चन्तीम् । रुदधातोस्तुदादित्वमप्यत एव प्रयोगात् कल्प्यम् । काक्षेण पश्यति अक्षिकोणेन विलोकते । अक्षम् इन्द्रियं तच्च प्रकृतेऽक्षिरूपम् । ईषदक्षं काक्षम् । 'ईषदर्थे' इति कोः

एतावाचार्यपितामहौ तां दृष्ट्वा लज्जायमानौ पटान्तान्तर्हितमुखौ स्थितौ । अहो अस्य वर्णाढ्यता । अहो भावोपपन्नता । अहो युक्तलेखता । सुव्यक्तमालिखितोऽयं चित्रपटः । प्रीतोऽस्मि । कोऽत्र ।

काञ्चुकीयः— जयतु महाराजः ।

दुर्योधनः—बादरायण! आनीयतां स विहगवाहनमात्रविस्मितो दूतः।

काञ्चुकीयः— यदाज्ञापयति महाराजः । (निष्क्रान्तः ।)

दुर्योधनः— वयस्य ! कर्ण !

प्राप्तः किलाद्य वचनादिह पाण्डवानां दौत्येन भृत्य इव कृष्णमतिः स कृष्णः ।
श्रोतुं सखे! त्वमपि सज्जय कर्ण! कर्णौ नारीमृदूनि वचनानि युधिष्ठिरस्य ॥

(ततः प्रविशति वासुदेवः काञ्चुकीयश्च ।)

वासुदेवः— अद्य खलु धर्मराजवचनाद् धनञ्जयाकृत्रिममित्रतया चाहवदर्पमनुक्तग्राहिणं सुयोधनं प्रति मयाप्यनुचितदौत्यसमयोऽनुष्ठितः ।

कादेशः । काक्षेणेति लिखतिनापि संबध्यते । काक्षेण गां लिखत्यपि कुत्सितेन पाशकेन भूमिं लिखति च । इह 'का पथ्यक्षयोः' इति कादेशः । नयज्ञः नीतिज्ञः द्यूतविशेषज्ञो वा 'नयो नीतिद्यूतविशेषयोः' इति मेदिनी ॥ १२ ॥

एतावित्यादि । लज्जायमानौ लज्जामनुभवन्तौ । 'सुखादिभ्यः'—इति क्यङ् । लज्जाशब्दस्य सुखादिषु पाठः कल्प्यः । पटान्तान्तर्हितमुखौ वस्त्राग्रच्छन्नवदनौ । अहो इति श्लाघायाम् । अस्य चित्रपटस्य । वर्णाढ्यता वर्णसम्पन्नता । भावोपपन्नता भावेन स्वभावेन आलेखनीयवस्तुगतेन, चित्रकाराभिप्रायेण वा उपपन्नता संवादिता । 'भावः सत्तास्वभावाभिप्रायचेष्टात्मजन्मसु' इति मेदिनी । युक्तलेखता युक्तः अन्यूनानतिरिक्तः लेखो लेखनं यस्मिन् स युक्तलेखः तस्य भावस्तत्ता ॥

बादरायणेत्यादि । विहगवाहनमात्रविस्मितः विहगः पक्षी गरुडः तद्रूपं वाहनं तन्मात्रेण विस्मितः गर्वितः ॥

प्राप्त इत्यादि । कृष्णमतिः मलिनबुद्धिः । त्वमपीत्यपिशब्देन अहं सज्जितकर्णः स्थित एवेति द्योत्यते । नारीमृदूनि स्त्रीवचनविक्लबानि । वृत्तौ नारीशब्दो नारीसमवेतवचनक्रियावर्ती ॥ १३ ॥

अद्येत्यादि । धनञ्जयाकृत्रिममित्रतया च धनञ्जयस्यार्जुनस्य अकृत्रिमं निरुपाधिकं मित्रं सुहृत् तस्य भावस्तत्ता तया च । **आहवदर्पम्** आहवे युद्धे दर्पः

कृष्णापराभवभुवा रिपुवाहिनीभकुम्भस्थलीदलनतीक्ष्णगदाधरस्य ।
भीमस्य कोपशिखिना युधि पार्थपत्रिचण्डानिलैश्च कुरुवंशवनं विनष्टम् ॥

इदं सुयोधनशिबिरम् । इह हि,

आवासाः पार्थिवानां सुरपुरसदृशाः स्वच्छन्दविहिता
विस्तीर्णाः शस्त्रशाला बहुविधकरणैः शस्त्रैरुपचिताः ।
हेषन्ते मन्दुरास्थास्तुरगवरघटा बृंहन्ति करिण
ऐश्वर्यं स्फीतमेतत् स्वजनपरिभवादासन्नविलयम् ॥ १५ ॥

भोः,

दुष्टवादी गुणद्वेषी शठः स्वजननिर्दयः ।
सुयोधनो हि मां दृष्ट्वा नैव कार्यं करिष्यति ॥ १६ ॥

भो बादरायण ! किं प्रवेष्टव्यम् ।

काञ्चुकीयः — अथकिमथकिम् । प्रवेष्टुमर्हति पद्मनाभः ।

वासुदेवः — (प्रविश्य) कथं कथं मां दृष्ट्वा संभ्रान्ताः सर्वक्षत्रियाः । अलमलं संभ्रमेण । स्वैरमासतां भवन्तः ।

अहङ्कारो यस्य तम् । अनुक्तग्राहिणम् उक्तावधीरिणम् । मयापि अननुष्ठितपूर्वानुचितकर्मणापि । समयशब्द आचारे सङ्केते वा ।

कृष्णेति । रिपुवाहिनीभकुम्भस्थलीदलनतीक्ष्णगदाधरस्य रिपुवाहिनीभानां शत्रुसेनागजानां कुम्भस्थल्या मस्तकस्थलस्य दलने पाटने तीक्ष्णा निर्दया या गदा आयुधविशेषः तस्या धरस्य धारयितुः । भीमस्य, कृष्णापराभवभुवा द्रौपदीपरिभवजन्मना । कोपशिखिना कोपाग्निना । पार्थपत्रिचण्डानिलैश्च अर्जुनबाणरूपैश्चण्डमातैश्च । कुरुवंशवनं कुरूणां वंशः कुलमेव वंशो बहुशाखत्वाद् वेणुः तस्य वनम् । विनष्टं, भावित्वेनाभिमतस्य विनाशस्य भूतत्ववचनम् अचिरावश्यम्भावद्योतनार्थम् ॥ १४ ॥

आवासा इत्यादि । बहुविधकरणैः बहुप्रकारव्यापारैः । हेषन्ते शब्दायन्ते । मन्दुरास्थाः अश्वशालास्थाः । तुरगवरघटाः अश्वश्रेष्ठसमूहाः । बृंहन्ति गर्जन्ति । बृहि शब्दे । करिणः गजाः । स्फीतं समृद्धम् । आसन्नविलयं सन्निहितनाशम् । इह तृतीयपादान्तलघोर्वैकल्पिकं गुरुत्वं बोद्धव्यम् ॥ १५ ॥

भो इति विषादसूचनं वक्ष्यमाणार्थचिन्तया ।

दुष्टेत्यादि । दुष्टवादी दुष्टं वदितुं शीलमस्येति तथा । शठः धूर्तः ॥ १६ ॥

कथमित्यादि । सम्भ्रान्ताः प्रत्युत्थाने व्यग्राः ॥

दुर्योधनः—कथं कथं केशवं दृष्ट्वा सम्भ्रान्ताः सर्वक्षत्रियाः । अलमलं सम्भ्रमेण । स्मरणीयः पूर्वमाश्रावितो दण्डः । नन्वहमाज्ञप्ता ।

वासुदेवः—(उपगम्य) भोः सुयोधन ! किमास्से ।

दुर्योधनः—(आसनात् पतित्वा आत्मगतम्) सुव्यक्तं प्राप्त एव केशवः ।

उत्साहेन मतिं कृत्वाप्यासीनोऽस्मि समाहितः ।
केशवस्य प्रभावेन चलितोऽस्म्यासनादहम् ॥ १७ ॥

अहो बहुमायोऽयं दूतः । (प्रकाशम्) भो दूत ! एतदासनमास्यतां ।

वासुदेवः—आचार्य ! आस्यताम् । गाङ्गेयप्रमुखा राजानः ! स्वैरमासतां भवन्तः । वयमप्युपविशामः । (उपविश्य) अहो दर्शनीयोऽयं चित्रपटः । मा तावत् । द्रौपदीकेशाम्बराकर्षणमत्रालिखितम् अहोतुखलु,

सुयोधनोऽयं स्वजनावमानं पराक्रमं पश्यति बालिशत्वात् ।
को नाम लोके स्वयमात्मदोषमुद्धाटयेन्नष्टघृणः सभासु ॥ १८ ॥

कथं कथं केशवमित्यादि । अहमिति स्वाज्ञानुष्ठापननिर्बन्धित्वं द्योतयति ॥

भो इत्यादि । किम् आस्से कुशली वर्तसे किमित्यर्थः । कुशलप्रश्नसमुदाचार ईदृशो भासनाटकेषूपलभ्यते ॥

आसनात् पतित्वेति । पतनं च ससंभ्रमं चलनम् । सम्भ्रमे च केशवप्राप्तिज्ञानं निमित्तम् ।

आसनादचलने प्रयत्नमास्थितस्यापि मम कृष्णप्राप्तिज्ञानमात्रेण ससम्भ्रमं यच्चलनं सञ्जातं तत् कृष्णस्य माहात्म्यादित्याह—**उत्साहेनेति** । अहं, समाहितः अविक्षिप्तचित्तः । उत्साहेन अविशङ्कयेत्यर्थः । मतिम् अनुत्थाननिश्चयम् । कृत्वापि, आसीनोऽस्मि । तथापीत्यर्थगम्यम् । केशवस्य, प्रभावेन महिम्ना । आसनात्, चलितः सम्भ्रमोत्थितः । अस्मि ॥ १७ ॥

अहो इत्यादि । बहुमायः बह्वी बहुप्रकारा माया शाम्बरी यस्य सः ॥

प्रत्युत्थानोपचारेणात्मानं सम्भावयतो द्रोणभीष्मादीन् प्रतिसत्कुर्वन्नाह—**आचार्येत्यादि** । गाङ्गेयप्रमुखाः भीष्ममुखाः । मुखं प्रगतः प्रमुखः मुख्यः । आपातदर्शनप्रवृत्तं चित्रपटश्लाघावादं तद्गतजुगुप्सितविशेषदर्शनेनाक्षिपति—**मा तावदिति** । 'केशधर्षणमि'ति क्वचित् पाठः । अहोतुखलु इत्याश्चर्ये ।

सुयोधन इत्यादि । पराक्रमं पश्यति शौर्यं मन्यते । बालिशत्वात् मौर्ख्यात् । नष्टघृणः निर्जुगुप्सः ॥ १८ ॥

आः अपनीयतामेष चित्रपटः ।

दुर्योधनः—बादरायण! अपनीयतां किल चित्रपटः ।

काञ्चुकीयः—यदाज्ञापयति महाराजः । (अपनयति ।)

दुर्योधनः—भो दूत!

धर्मात्मजो वायुसुतश्च भीमो भ्रातार्जुनो मे त्रिदशेन्द्रसूनुः ।
यमौ च तावश्विसुतौ विनीतौ सर्वे सभृत्याः कुशलोपपन्नाः ॥ १९ ॥

वासुदेवः—सदृशमेतद् गान्धारीपुत्रस्य । अथकिमथकिम् । कुशलिनः सर्वे । भवतो राज्ये शरीरे बाह्याभ्यन्तरे च कुशलमनामयं च पृष्ट्वा विज्ञापयन्ति युधिष्ठिरादयः पाण्डवाः—

अनुभूतं महद् दुःखं संपूर्णः समयः स च ।
अस्माकमपि धर्म्यं यद् दायाद्यं तद् विभज्यताम् ॥ २० ॥

इति ।

दुर्योधनः—कथं कथं दायाद्यमिति । भोः,

वने पितृव्यो मृगयाप्रसङ्गतः कृतापराधो मुनिशापमाप्तवान् ।
तदा प्रभृत्येव स दारनिःस्पृहः परात्मजानां पितृतां कथं व्रजेत् ॥ २१ ॥

धर्मात्मज इत्यादि । त्रिदशेन्द्रसूनुः देवेन्द्रपुत्रः । यमौ युग्मजातौ नकुलसहदेवौ । अश्विसुतौ अश्विनोर्देवतयोः पुत्रौ । कुशलोपपन्नाः क्षेमयुक्ताः किम् । इह प्रश्नकाकुः ॥ १९ ॥

सदृशमित्यादि । अथकिमित्यङ्गीकारे । बाह्यान्तरे शरीरे च बहिर्भवे अभ्यन्तरभवे देहे च । तत्राभ्यन्तरं शरीरं मनः । अनामयम् आरोग्यम् ।

अनुभूतमित्यादि । स समयः एकवर्षाज्ञातवाससङ्केतसचिवो द्वादशवर्षवनवाससङ्केतः । धर्म्यं धर्मादनपेतम् । दायाद्यं पितृरिक्थं । दायः कुलधनं दायरूपम् आद्यम् अदनीयं भोग्यं वस्तु दायाद्यमिति व्युत्पत्तिः ॥ २० ॥

कथमित्यादि । इतिशब्दानन्तरम् उच्यत इति शेषः । एवञ्च पार्थानां दायाद्यमेव नास्तीत्यर्थः ।

अस्माभिर्भुज्यमानं पितृव्यस्य पाण्डोर्धनं पार्थान् प्रति तदा दायाद्यं स्याद्, यदि पाण्डुस्तेषां पिता स्यात् । स तु तान् प्रति पितैव न भवतीत्याह—वन इति ।

वासुदेवः—पुराविदं भवन्तं पृच्छामि—

विचित्रवीर्यो विषयी विपत्तिं क्षयेण यातः पुनरम्बिकायाम् ।

व्यासेन जातो धृतराष्ट्र एष लभेत राज्यं जनकः कथं ते ॥ २२ ॥

मा मा भवान्,

एवं परस्परविरोधविवर्धनेन शीघ्रं भवेत् कुरुकुलं नृप! नामशेषम् ।

तत् कर्तुमर्हति भवानपकृष्य रोषं यत् त्वां युधिष्ठिरमुखाः प्रणयाद् ब्रुवन्ति ॥

दुर्योधनः—भो दूत! न जानाति भवान् राज्यव्यवहारम् ।

पितृव्यः पितृभ्राता पाण्डुः । वने, मृगयाप्रसङ्गतः आखेटप्रसक्त्या । कृतापराधः, अपराधश्च, मृग्या सह मृगरूपं धृत्वा क्रीडतः किन्दमाख्यस्य मुनेर्वधरूपः । अत एव, मुनिशापं 'पत्नीसंसर्गे मरिष्यसी'त्येवमात्मकं मुनेर्निग्रहवचनम् । आप्तवान् । तदा प्रभृत्येव शापप्राप्तिकालादारभ्यैव । दारनिःस्पृहः कलत्रानिराशः । सः पितृव्यः । परात्मजानां परेषाम् अन्येषां धर्म-वायु-शक्राश्विनाम् आत्मजाः पुत्राः परात्मजाते परेषाम् । पितृतां, कथं व्रजेत् नैव व्रजेदित्यर्थः ॥ २१ ॥

पुरेत्यादि । पुराविदं पुरावृत्तज्ञम् ।

विचित्रेति । विषयी विषयासक्तः । विचित्रवीर्यः, क्षयेण राजयक्ष्मणा । विपत्तिं यातः मृतिं गतः । पुनः पश्चात् । व्यासेन महर्षिणा निमित्तेन । अम्बिकायां विचित्रवीर्यभार्यायाम् । जातः, ते, जनकः पिता । एषः धृतराष्ट्रः, राज्यम् अपितुर्विचित्रवीर्यस्य राष्ट्रम् । कथं केन न्यायेन । लभेत । यदि परात्मजो धृतराष्ट्रो विचित्रवीर्यस्य क्षेत्रजः पुत्र इति कृत्वा "अपुत्रेण परक्षेत्रे नियोगोत्पादितः सुतः । उभयोरप्यसौ रिक्थी पिण्डदाता च धर्मतः ॥" इति शास्त्रात् क्षेत्रिरिक्थं लभेत, तर्हि पार्था अपि क्षेत्रजाः पाण्डोः क्षेत्रिभूतस्य रिक्थं लभेरन्नेवेति भावः ॥ २२ ॥

मा मा भवानेवमिति । हे नृप! भवान्, एवं 'परात्मजानां पितृतां कथं व्रजेद्' इत्यनेन प्रकारेण । मा मा, कथयत्वित्यर्थगम्यम् । कथने दोषमाह—परस्परेत्यादिना । नामशेषं नष्टम् । अपकृष्य नियम्य । प्रणयात् स्नेहाद् अथवा प्रार्थनयेत्यर्थः ॥ २३ ॥

भो दूतेत्यादि । भवानिति अराजकुलप्रसूतत्वं द्योतयति । अत एव राज्यव्यवहारानभिज्ञत्ववाचोयुक्तिरुपपन्नतरा । राजत्वं हि यदुकुलस्य खण्डितं पूर्वपुरुषययातिशापात् ।

राज्यं नाम नृपात्मजैः सहृदयैर्जित्वा रिपून् भुज्यते
तल्लोके न तु याच्यते न तु पुनर्दीनाय वा दीयते ।
काङ्क्षा चेन्नृपतित्वमाप्तुमचिरात् कुर्वन्तु ते साहसं
स्वैरं वा प्रविशन्तु शान्तमतिभिर्जुष्टं शमायाश्रमम् ॥ २४ ॥

वासुदेवः—भोः सुयोधन ! अलमलं बन्धुजने परुषमभिधातुम् ।

पुण्यसञ्चयसम्प्राप्तामधिगम्य नृपश्रियम् ।
वञ्चयेद् यः सुहृद्बन्धून् स भवेद् विफलश्रमः ॥ २५ ॥

दुर्योधनः—भो दूत !

श्यालं तव गुरोर्भूपं कंसं प्रति न ते दया ।
कथमस्माकमेवं स्यात् तेषु नित्यापकारिषु ॥ २६ ॥

राज्यमिति । राज्यं नाम, नामेति सम्भावनायाम् । सहृदयैः सचित्तैः समुन्नतचित्तैरित्यर्थः । नृपात्मजैः नृपस्य औरसैः पुत्रैः । रिपून् शत्रून् । जित्वा अभिभूय । भुज्यते अनुभूयते । यथास्माभिस्तथेत्यार्थम् । लोके, तद् राज्यम् । न तु याच्यते नैव भिक्ष्यते । यथा पार्थैस्तथेत्यार्थम् । वा अथवा । दीनाय दरिद्राय । न तु पुनः दीयते नैव दीयते । इत्थं राज्यव्यवहारस्य स्थितौ पार्थैर्यत् कर्तव्यं तद् बोधयति—नृपतित्वं राजत्वम् । अचिराद् अविलम्बम् । आप्तुं लब्धुं । काङ्क्षा इच्छा । चेद् अस्ति यदि । ते पार्थाः । साहसं युद्धम् । कुर्वन्तु, अर्थादस्माभिः सह । वा पक्षान्तरे राज्येप्साभावे इत्यर्थः ; शान्तमतिभिः निर्मत्सरबुद्धिभिः अर्थाद् मुनिभिः । जुष्टं सेवितम् आश्रमं मुनिगृहम् । शमाय शान्त्यर्थम् । स्वैरं स्वच्छन्दम् । प्रविशन्तु ॥ २४ ॥

अलमित्यादि । न युज्यत इत्यर्थेऽलंशब्दः । द्विरुक्तिर्दार्ढ्याय । परुषं निष्ठुरम् ।

पुण्येति । यः, पुण्यसञ्चयसंप्राप्तं सञ्चितपुण्योपनताम् । नृपश्रियं राजलक्ष्मीम् । अधिगम्य स्वीकृत्य । सुहृद्बन्धून्, वञ्चयेत् नृपश्रीसंविभागेन नानुगृह्णीयात् । सः, विफलश्रमः विफलः इष्टासिद्ध्या निष्फलः अनिष्टप्राप्त्या विपरीतफलो वा श्रमः वञ्चनविषय आयासो यस्य स तथा । भवेत् । सुहृद्बन्धुविषयया वञ्चनया इष्टासिद्धिरनिष्टप्राप्तिश्च भवतीत्यभिप्रायः ॥ २५ ॥

बन्धुवञ्चनोक्तिमसहमान आह—श्यालमिति । तव, गुरोः पितुर्वसुदेवस्य श्यालं पत्नीभ्रातरम् । अर्थात् स्वन्मातुलम् । भूपं राजानम् । कंसं प्रति, ते,

वासुदेवः — अलं तन्मद्दोषतो ज्ञातुम् ।

कृत्वा पुत्रवियोगार्तां बहुशो जननीं मम ।
वृद्धं स्वपितरं बद्ध्वा हतोऽयं मृत्युना स्वयम् ॥ २७ ॥

दुर्योधनः — सर्वथा वञ्चितस्त्वया कंसः । अलमात्मस्तवेन । न शौर्यमेतत् । पश्य,

जामातृनाशव्यसनाभितप्ते रोषाभिभूते मगधेश्वरेऽथ ।
पलायमानस्य भयातुरस्य शौर्यं तदेतत् क गतं तवासीत् ॥ २८ ॥

वासुदेवः — भोः सुयोधन! देशकालावस्थापेक्षि खलु शौर्यं नयानुगामिनाम् । इह तिष्ठतु तावदस्मद्गतः परिहासः । स्वकार्यमनुष्ठीयताम् ।

दया, न, नासीत् । स हि निहतस्त्वयेत्यर्थः । एवं, सुहृद्बन्धुमुख्ये स्वमातुलेऽपि तव दया नेत्येवं स्थित इत्यर्थः । नित्यापकारिषु, तेषु पाण्डवेषु विषये । अस्माकं, कथं स्यात्, अर्थाद् दया ॥ २६ ॥

अलमिति । तत् कंसहननम् । मद्दोषतो ज्ञातुं मद्दोषान्निष्पन्नं मन्तुम् । अलं न युज्यते ।

कंस आत्मदोषादेव मृत्युवशं गत इत्याह — कृत्वेत्यादि । स्वपितरम् उग्रसेनम् । शिशुभूतबहुभागिनेयहननं, निरपराधनिजभगिनीशोकोत्पादनम्, आत्मपितृबन्धनम् इत्येतैः पापकृत्यैः कंसः स्वयमेव मृत्युवशं गतो न तु मया हत इति श्लोकाभिप्रायः ॥ २७ ॥

सर्वथेत्यादि । एतत् कंसहननम् । शौर्यं न, शूरकर्म न भवति । पश्य वक्ष्यमाणं जानीहीत्यर्थः ।

जामात्रिति । अथ कंसवधानन्तरम् । जामातृनाशव्यसनाभितप्ते जामातुः स्वदुहितृभर्तुः कंसस्य नाशेन यद् व्यसनं दुःखं तेनाभितप्ते । मगधेश्वरे जरासन्धे । रोषाभिभूते सति कोपाविष्टे सति, कोपात् त्वां प्रति कृताभिषेणने सतीत्यार्थम् । भयातुरस्य भयपीडितस्य । अत एव पलायमानस्य स्वावासदेशं परित्यज्य धावतः । तत्र तदेतद्, यत् कंसे प्रयुक्तं तदिदमित्यर्थः । शौर्यं, क, गतम् आसीत् ॥ २८ ॥

भो इत्यादि । देशकालावस्थापेक्षि देशं कालम् अवस्थां च अपेक्षितुं शीलमस्येति तथा । अपेक्षितमिति पाठे सञ्जातापेक्षं देशकालावस्थासापेक्षमित्यर्थः ।

कर्तव्यो भ्रातृषु स्नेहो विस्मर्तव्या गुणेतराः ।
सम्बन्धो बन्धुभिः श्रेयान् लोकयोरुभयोरपि ॥ २९ ॥

दुर्योधनः —
देवात्मजैर्मनुष्याणां कथं वा बन्धुता भवेत् ।
पिष्टपेषणमेतावत् पर्याप्तं छिद्यतां कथा ॥ ३० ॥

वासुदेवः — (आत्मगतम्)
प्रसाद्यमानः साम्नायं न स्वभावं विमुञ्चति ।
हन्त संक्षोभयाम्येनं वचोभिः परुषाक्षरैः ॥ ३१ ॥

(प्रकाशम्) भोः सुयोधन ! किं न जानीषेऽर्जुनस्य बलपराक्रमम् ।

दुर्योधनः — न जाने ।

वासुदेवः — भोः ! श्रूयतां,
कैरातं वपुरास्थितः पशुपतिर्युद्धेन सन्तोषितो
वह्नेः खाण्डवमश्नतः सुमहती वृष्टिः शरैश्छादिता ।
देवेन्द्रार्तिकरा निवातकवचा नीता क्षयं लीलया
नन्वेकेन तदा विराटनगरे भीष्मादयो निर्जिताः ॥ ३२ ॥

एवञ्च जरासन्धाभियाने शौर्यं देशकालाननुगुणत्वान्न प्रयुक्तमित्यभिप्रायः । नयानुगामिनां नीत्यनुसारिणाम् । अस्मद्गतः अस्मत्संबद्धः ।

कर्तव्य इत्यादि । गुणाः इतरे अन्ये येभ्यस्ते गुणेतराः दोषाः । उभयोः इह परत्र च ॥ २९ ॥

देवेत्यादि । देवात्मजैः देवानां यमादीनां पुत्रैः । पिष्टपेषणं पिष्टपेषणकल्पं 'राज्यं दीयतामि'त्यस्यार्थस्योक्तस्यैव पुनःपुनर्वचनम् । पर्याप्तं यथेप्सितम् । कथा राज्यदानप्रस्तावः । छिद्यतां विरम्यताम् ॥ ३० ॥

प्रसाद्यमान इत्यादि । साम्ना सान्त्वेन । हन्तेति सम्भ्रमे । संक्षोभयामि स्वनिश्चयाद् विचालयामि ॥ ३१ ॥

भो इत्यादि । बलपराक्रमं बलं शक्तिः तद्युक्तं विक्रमम् ।

कैरातमित्यादि । कैरातं किरातस्य व्याधस्येदम् । आस्थितः आश्रितः । पशुपतिः परमेश्वरः । खाण्डवं तदाख्यं वनम् । अश्नतः दहतः । वृष्टिः इन्द्रोत्पादितं मेघवर्षम् । निवातकवचाः असुरविशेषाः । एकेन असहायेन ॥ ३२ ॥

अपिच, तवापि प्रत्यक्षमपरं कथयामि ।

ननु त्वं चित्रसेनेन नीयमानो नभस्तलम् ।
विक्रोशन् घोषयात्रायां फल्गुनेनैव मोक्षितः ॥ ३३ ॥

किं बहुना,

दातुमर्हसि मद्वाक्याद् राज्यार्धं धृतराष्ट्रज ! ।
अन्यथा सागरान्तां गां हरिष्यन्ति हि पाण्डवाः ॥ ३४ ॥

दुर्योधनः—कथं कथम् । हरिष्यन्ति हि पाण्डवाः ।

प्रहरति यदि युद्धे मारुतो भीमरूपी
प्रहरति यदि साक्षात् पार्थरूपेण शक्रः ।
परुषवचनदक्ष ! त्वद्वचोभिर्न दास्ये
तृणमपि पितृभुक्ते वीर्यगुप्ते स्वराज्ये ॥ ३५ ॥

नन्वित्यादि । चित्रसेनेन गन्धर्वविशेषेण । फल्गुनेनैव अर्जुनेनैव, न तु त्वत्सुहृत्तमैः कर्णादिभिः । मोक्षितः मोचितः ॥ ३३ ॥

दातुमित्यादि । राज्यार्धं राज्यस्य अर्धः असमो यः कश्चिदंशो राज्यार्धः तम् । समांशविवक्षायां तु अर्धशब्दस्य क्लीबत्वाद 'अर्धं नपुंसकम्' इति समासे अर्धराज्यमिति स्यात् । असमांशदानोक्त्या च "पञ्च नस्तात दीयन्तां ग्रामा वा नगराणि वा । वसेम सहिता येषु मा च नो भरता नशन् ॥" इति महाभारतोक्तः पञ्चग्रामप्रार्थनरूपः अवरपक्षः सूचितः । सागरान्तां समुद्रसीमाम् । हरिष्यन्ति हि बलाद् ग्रहीष्यन्त्येव ॥ ३४ ॥

कथमित्यादि । कथंशब्दो गर्हायाम् । हरिष्यन्तीत्यत्र काकुः ।

प्रहरतीति । मारुतः वायुदेवः । भीमरूपी भीमसेनरूपवान् सन् । युद्धे अचिरभाविनि रणे । प्रहरति यदि, पुत्रपक्षपातात् प्रहरिष्यति चेदित्यर्थः । वर्तमानसामीप्ये लट् । प्रहरतिरिहाकर्मक आयुधप्रयोगे वर्तते । प्रहरत्वित्यध्याहारः, अनुज्ञायां च लोट्, कामं प्रहरणमभ्यनुजानामि न ह्यहं प्रहरणाद् बिभेमीत्यभिप्रायः । शक्रः इन्द्रः । साक्षात् प्रत्यक्षम् । पार्थरूपेण अर्जुनरूपं धृत्वेत्यर्थः । प्रहरति यदि, प्रहरत्विति पूर्ववत् । हे परुषवचनदक्ष ! निष्ठुरभाषणचतुर ! । पितृभुक्ते मत्पित्रानुभूते । वीर्यगुप्ते मद्वीर्यरक्षिते । स्वराज्ये, तृणमपि परमाल्पमंशमपीत्यर्थः । त्वद्वचोभिः त्वद्वचनानुसारेण । न दास्ये, न वितरिष्यामि ॥ ३५ ॥

वासुदेवः — भोः कुरुकुलकलङ्कभूत ! अयशोलुब्ध ! वयं किल तृणान्तराभिभाषकाः ।

दुर्योधनः — भो गोपालक ! तृणान्तराभिभाष्यो भवान् ।

अवध्यां प्रमदां हत्वा हयं गोवृषमेव च ।
मल्लानपि सुनिर्लज्जो वक्तुमिच्छसि साधुभिः ॥ ३६ ॥

वासुदेवः — भोः सुयोधन ! ननु क्षिपसि माम् ।

दुर्योधनः — ननु सत्यमेवैतत् ।

वासुदेवः — गच्छामि तावत् ।

दुर्योधनः — गच्छ गच्छ पशुखुरोद्धतरेणुरूषिताङ्गो व्रजमेव । विफलीकृतः कालः ।

वासुदेवः — एवमेवास्तु । न वयमनुक्तसन्देशा गन्तुमिच्छामः । तदाकर्ण्यतां युधिष्ठिरस्य सन्देशः ।

दुर्योधनः — आः अभाष्यस्त्वम् ।

अहमवधृतपाण्डरातपत्रो द्विजवरहस्तधृताम्बुसिक्तमूर्धा ।
अवनतनृपमण्डलानुयात्रैः सह कथयामि भवद्विधैर्न भाषे ॥ ३७ ॥

भो इत्यादि । तृणेन अन्तरं व्यवधानं येषाम् अभिभाष्येण सह ते तृणान्तराः, तृणान्तराः सन्तोऽभिभाषकाः तृणान्तराभिभाषकाः । तृणमन्तरतः कृत्वैव त्वमस्माकमभिभाष्यो न साक्षादित्यभिप्रायः ॥

अवध्यामित्यादि । अवध्यां वधानर्हां । प्रमदां स्त्रियं पूतनां नाम दानवीम् । हयम् अश्वरूपं केशिनामानमसुरम् । गोवृषम् अरिष्टर्षभं दानवम् । मल्लान् चाणूरादीन् मल्लजातिभवान् । व्रात्यपूर्वायां क्षत्रियायां क्षत्रियाज्जाता मल्ला उच्यन्ते, ते च मुष्टियुद्धाद्यभ्यासवृत्तयः । सुनिर्लज्जः सुष्ठु लज्जारहितः । अबलामृगदुर्बलहननं शिष्टगर्हितं कृतवतो हि लज्जोचिता । साधुभिः सद्भिर्मद्विधैः ॥ ३६ ॥

भो इत्यादि । क्षिपसि निन्दसि ॥

गच्छेत्यादि । व्रजमेव । गोपालकस्य गोष्ठगमनं युक्तम् । विफलीकृतः अनभिभाष्याभिभाषणे विनियुक्तत्वात् ॥

अहमित्यादि । सिक्तेति सेचनं राज्याभिषेकः । अवनतनृपमण्डलानुयात्रैः अवनतस्य मदधश्चरस्य नृपमण्डलस्य अनुयात्रैः अनुयायिभिर्भृत्यैरित्यर्थः । कंस-

वासुदेवः — न व्याहरति किल मां सुयोधनः । भोः!

शठ! बान्धवनिःस्नेह! काक! केकर! पिङ्गल! ।
त्वदर्थात् कुरुवंशोऽयमचिरान्नाशमेष्यति ॥ ३८ ॥

भो भो राजानः! गच्छामस्तावत् ।

दुर्योधनः — कथं यास्यति किल केशवः । दुःशासन! दुर्मर्षण! दुर्मुख! दुर्बुद्धे! दुष्टेश्वर! दूतसमुदाचारमतिक्रान्तः केशवो बध्यताम् । कथमशक्ताः । दुःशासन! न समर्थः खल्वसि ।

करितुरगनिहन्ता कंसहन्ता स कृष्णः
पशुपकुलनिवासादानुजीव्यानभिज्ञः ।
हृतभुजबलवीर्यः पार्थिवानां समक्षं
स्ववचनकृतदोषो बध्यतामेव शीघ्रम् ॥ ३९ ॥

अयमशक्तः । मातुल! बध्यतामयं केशवः । कथं पराङ्मुखः पतति । भवतु, अहमेव पाशैर्बध्नामि । (पाशमुद्यम्योपसर्पति ।)

भृत्य इतिवत् क्षेपोऽयम् । कथयामि प्रतिजाने । कथयतः कथयामीत्युक्तिर्हि विशिष्टे कथने प्रतिज्ञानरूपे पर्यवस्यति । प्रतिज्ञानविषयश्च भवादृशैः साकम् अभाषणम् ॥ ३७ ॥

शठेति । शठ! वञ्चक! । काक! कटुभाषित्वात् काकसदृश! । केकर! विकृताक्ष! । तारकामपाङ्ग आकृष्य वीक्षको हि केकरः । काककेकरेत्येकपदं वा उपमानसमासात् । पिङ्गल! चपलत्वाद् वानरकल्प! त्वदर्थात् त्वन्निमित्तात् । अयं, कुरुवंशः, नाशम् अभावम् । एष्यति प्राप्स्यति ॥ ३८ ॥

अथ जिगमिषुं भगवन्तं बन्धुं सुयोधनस्य संरम्भः **कथं यास्यतीत्यादिना** प्रकाश्यते । दूतसमुदाचारम् अतिक्रान्तः दूतमर्यादामतिक्रम्य स्थितः । अतोऽपराधी बन्धनार्ह इत्यर्थः । न समर्थः अर्थात् केशवं बन्धुम् ।

करीत्यादि । करितुरगनिहन्ता करिणः उत्पलापीडाख्यस्य गजस्य तुरगस्य अश्वासुरस्य च निहन्ता । पशुपकुलनिवासात् गोपालगृहनिवासात् । आनुजीव्यानभिज्ञः आनुजीव्यस्य अनुजीविकर्मणः अनभिज्ञः ॥ ३९ ॥

बन्धुं कृतप्रयत्नस्य दुश्शासनस्याशक्तिमुपलभ्याह — **अयमशक्त** इति । शकुनिं चोदयति — **मातुलेत्यादि** । **कथमित्यादि** । पतति, बन्धुं किमपि चेष्टित्वा

8887

वासुदेवः—कथं मवितुकामो मां किल सुयोधनः । भवतु, सुयोधनस्य सामर्थ्यं पश्यामि । (विश्वरूपमास्थितः ।)

दुर्योधनः—भो दूत !

सृजसि यदि समन्ताद् देवमायाः स्वमायाः
प्रहरसि यदि वा त्वं दुर्निवारैः सुरास्त्रैः ।
हयगजवृषभाणां पातनाज्जातदर्पो
नरपतिगणमध्ये बध्यसे त्वं मयाद्य ॥ ४० ॥

आः तिष्ठेदानीम् । कथं न दृष्टः केशवः । अयं केशवः । अहो ह्रस्वत्वं केशवस्य । आः तिष्ठेदानीम् । कथं न दृष्टः केशवः । अयं केशवः । अहो दीर्घत्वं केशवस्य । कथं न दृष्टः केशवः । अयं केशवः । सर्वत्र मन्त्रशालायां केशवा भवन्ति । किमिदानीं करिष्ये । भवतु, दृष्टम् । भो भो राजानः ! एकैकः केशवो बध्यताम् । कथं स्वयमेव पाशैर्बद्धाः पतन्ति राजानः । साधु भो जम्भक ! साधु ।

परिश्रान्तो भुवि पततीत्यर्थः । भवत्विति निषेधेऽव्ययम् । दुश्शासनादयो मा बध्नन्तु ॥

कथमित्यादि । मवितुकामः मवितुं बन्धुं काम इच्छा यस्य सः । मव बन्धने भ्वादिः । विश्वरूपं विश्वं कृत्स्नं जगत्, तदात्मकं रूपम् अपरिच्छिन्नम् आत्मनः स्वरूपमित्यर्थः । आस्थितः अङ्गीकृतवान् ॥

भगवतो विश्वरूपप्रदर्शनं मोहादिन्द्रजालप्रयोगं मन्यमान आह—**सृजसीत्यादि** । देवमायाः देवानां मायाः । स्वमायाः आत्मदृष्टा मायाः । **सुरास्त्रैः** देवास्त्रैः । इह 'सृजसि यदि' इत्यत्र 'सृजे'त्यध्याहारः । यथाकामं मायाः **सृज**, न मे त्वन्मायासर्गाद् भयमिति भावः । तथा 'प्रहरसि यदि' इत्यत्र 'प्रहरे'त्यध्याहारः' यथाकामं प्रहर, न मे सुरास्त्रप्रहाराद् भयमिति भावः ॥ ४० ॥

अथात्यद्भुतभगवद्विश्वरूपदर्शनोद्भ्रान्तस्य **भ्रमविलसितवर्णनायोपक्रमः**—**आस्तिष्ठेत्यादिना** । दृष्टस्य भगवतो झटिति तिरोभावादाह—कथमित्यादि । पुनराविर्भावादाह—अयं केशव इति । एवमुत्तरत्र । नृपान् केशवबन्धनार्थमुद्यम्य पाशैरात्मानमेव बद्ध्वा भूमौ पतितान् दृष्ट्वाह—कथं स्वयमेवेत्यादि । जम्भक ! मायाविन् ! ।

मत्कार्मुकोदरविनिःसृतबाणजालैर्विद्धं क्षरत्क्षतजरञ्जितसर्वगात्रम् ।
पश्यन्तु पाण्डुतनयाः शिबिरोपनीतं त्वां बाष्परुद्धनयनाः परिनिःश्वसन्तः ॥

(निष्क्रान्तः ।)

वासुदेवः — भवतु, पाण्डवानां कार्यमहमेव साधयामि । भोः सुदर्शन ! इतस्तावत् ।

(ततः प्रविशति सुदर्शनः ।)

सुदर्शनः — एष भोः !

श्रुत्वा गिरं भगवतो विपुलप्रसादान्निर्धावितोऽस्मि परिवारिततोयदौघः ।
कस्मिन् खलु प्रकुपितः कमलायताक्षः कस्याद्य मूर्धनि मया प्रविजृम्भितव्यम् ॥

क्वनुखलु भगवान् नारायणः ।

अव्यक्तादिरचिन्त्यात्मा लोकसंरक्षणोद्यतः ।
एकोऽनेकवपुः श्रीमान् द्विषद्बलनिषूदनः ॥ ४३ ॥

(विलोक्य) अये अयं भगवान् हस्तिनपुरद्वारे दूतसमुदाचारेणोपस्थितः । कुतः खल्वापः कुतः खल्वापः । भगवति ! आकाशगङ्गे ! आपस्तावत् । हन्त स्रवति । (आचम्योपसृत्य) जयतु भगवान् नारायणः । (प्रणमति ।)

मदित्यादि । विद्धं विदारितम् । अत एव क्षरत्क्षतजरञ्जितसर्वगात्रं स्रवद्रक्तारुणितसर्वावयवम् ॥ ४१ ॥

भवत्वित्यादि । दुर्योधननिग्रहाय स्वचक्रराजमाह्वयति—भो इत्यादि । आयाहीति शेषः ॥

तत इत्यादि । सुदर्शन इति पुंस्त्वं सुदर्शनाभिमानिदेवाभिप्रायम् ॥

श्रुत्वेत्यादि । भगवतः, ऐश्वर्यवीर्ययशःश्रीज्ञानवैराग्याणि भगाः तद्वतः । निर्धावितः नितरां शीघ्रमागतः । परिवारिततोयदौघः परित उत्सारितमेघबृन्दः । कस्मिन् द्वेष्यजने । प्रविजृम्भितव्यं प्रविजृम्भितुं पराक्रमितुम् अर्हम् ॥ ४२ ॥

अव्यक्तेत्यादि । अव्यक्तादिः अव्यक्तस्य कारणभूतायाः प्रकृतेः आदिः कारणभूतः । अचिन्त्यात्मा ईदृक्तादृगित्यप्रतर्क्यस्वरूपः । द्विषद्बलनिषूदनः शत्रुबलनाशकः ॥ ४३ ॥

अये इत्यादि । कुतः खल्वाप इति द्विरुक्तिः संभ्रमात् । स्रवति शौचार्थमर्थितं जलं स्वर्गङ्गा स्यन्दयतीत्यर्थः ॥

वासुदेवः — सुदर्शन ! अप्रतिहतपराक्रमो भव ।

सुदर्शनः — अनुगृहीतोऽस्मि ।

वासुदेवः — दिष्ट्या भवान् कर्मकाले प्राप्तः ।

सुदर्शनः — कथं कथं कर्मकाल इति । आज्ञापयतु भगवानाज्ञापयतु ।

किं मेरुमन्दरकुलं परिवर्तयामि संक्षोभयामि सकलं मकरालयं वा ।
नक्षत्रवंशमखिलं भुवि पातयामि नाशक्यमस्ति मम देव ! तव प्रसादात् ॥

वासुदेवः — भोः सुदर्शन ! इतस्तावत् । भोः सुयोधन !

यदि लवणजलं वा कन्दरं वा गिरीणां ग्रहगणचरितं वा वायुमार्गं प्रयासि ।
मम भुजबलयोगप्राप्तसंजातवेगं भवतु चपल ! चक्रं कालचक्रं तवाद्य ॥

सुदर्शनः — भोः सुयोधनहतक ! तिष्ठ तिष्ठ । (पुनर्विचार्य) प्रसीदतु भगवान् नारायणः ।

महीभारापनयनं कर्तुं जातस्य भूतले ।
अस्मिन्नेवं गते देव ! ननु स्याद् विफलः श्रमः ॥ ४६ ॥

दिष्ट्येत्यादि । दिष्ट्येति हर्षेऽव्ययम् । कर्मकाले क्रियाकाले ॥

किमित्यादि । मेरुमन्दरकुलं मेरुमन्दरयोः पर्वतयोः कुलं राजिम् । परिवर्तयामि किं विनिमये किं, मेरुकुलस्थाने मन्दरकुलं तत्स्थाने मेरुकुलं च स्थापयामि किमित्यर्थः । मकरालयं समुद्रम् । नक्षत्रवंशं नक्षत्रमण्डलम् ॥ ४४ ॥

भो इत्यादि । इतस्तावदिति । पश्येति शेषः । सुयोधनावस्थानदेशप्रदर्शनं चेदम् । अस्मिन् प्रदेशे स्थितः सुयोधनस्तत्र लक्ष्य इति तात्पर्यम् ।

यदीत्यादि । लवणजलं क्षारसागरम् । ग्रहगणचरितं ग्रहगणेन चरितं सञ्चारविषयीकृतम् । वायुमार्गं वायोः परिवहाख्यस्य मार्गम् । प्रयासि यदि गच्छसि चेत् । प्रयाहीत्यध्याहारः । प्राणपरित्राणार्थं यत्र क्वापि गच्छसि चेद् यथेच्छं गच्छेत्यभिप्रायः। तथापि मदीयं चक्रं त्वामद्यैव हनिष्यतीत्यभिप्रायकं ममेत्यादि । भुजबलयोगप्राप्तसञ्जातवेगं भुजबलयोगप्राप्तं बाहुवीर्यसम्बन्धं प्राप्तं, सञ्जातवेगं च । 'द्वितीया श्रितातीते'त्यादिना द्वितीयान्तस्य प्राप्तपदेन समासः । कालचक्रं यमचक्रम् ॥ ४५ ॥

महीति । हे देव !, महीभारापनयनं मह्या भूमेः यो भारो दुर्जनातिवृद्धिजनितः, तस्य अपनयनं दुर्जनक्षपणेन परिहरणम् । कर्तुं भीमार्जुनादिद्वारेण विधातुम् ।

वासुदेवः—सुदर्शन! रोषात् समुदाचारो नावेक्षितः । गम्यतां स्वनिलयमेव ।

सुदर्शनः—यदाज्ञापयति भगवान् नारायणः । कथं कथं गोपालक इति । त्रिचरणातिक्रान्तत्रिभुवनो नारायणः खल्वत्रभवान् । शरणं व्रजन्तु भवन्तः । यावद् गच्छामि । अये एतद् भगवदायुधवरं शार्ङ्गं प्राप्तम् ।

तनुमृदुललिताङ्गं स्त्रीस्वभावोपपन्नं हरिकरधृतमध्यं शत्रुसङ्घैककालः ।
कनकखचितपृष्ठं भाति कृष्णस्य पार्श्वे नवसलिलदपार्श्वे चारु विद्युल्लतेव ॥

भूतले, जातस्य अवतीर्णस्य अर्थात् तव । श्रमः मनुष्यरूपेणावतरणयत्नः । अस्मिन् दुर्योधने । एवं गते सति इमं प्रकारं प्राप्ते । मया निहते सतीत्यर्थः । विफलो ननु स्यात् निष्फल एव भवेत् । युद्धप्रवर्तकसुयोधनाभावेन युद्धाभावे जनक्षयाभावादिति भावः ॥ ४६ ॥

सुदर्शनेत्यादि । समुदाचारः तटस्थवृत्तिः स्वकृत्यं वा । स्वनिलयमेव स्वस्यालयमुद्दिश्यैव । गम्यतां, न त्विदानीं सुयोधनो हन्यतामित्यर्थः ॥

यदित्यादि । कथं कथं गोपालक इति । गोपालक इति बुद्धिर्वो गर्हितेत्यर्थः । कथंशब्दो गर्हायाम् । कस्तर्ह्ययं तत्राह—त्रिचरणेत्यादि । त्रिचरणातिक्रान्तत्रिभुवनः त्रिभिश्चरणैः पदन्यासैः अतिक्रान्तं लङ्घितं त्रिभुवनं लोकत्रयं येन सः । त्रिभुवन इत्यस्य स्थाने त्रिलोक इत्यपि पाठः । तदा त्रिचरणातिक्रान्ताः त्रवयवा लोका येन स इति विग्रहः । भवन्तः, शरणं व्रजन्तु रक्षकं प्रपद्यन्ताम्, अर्थाद् भगवन्तं । यावद् गच्छामि गमिष्यामि । 'यावत्पुरानिपातयोर्लट्' इति लट् । अथ भगवदनुज्ञया गच्छतः सुदर्शनस्य क्रमेण शार्ङ्गकौमोदकीपाञ्चजन्यनन्दकगरुडैः पथि समागमं, भगवदभिप्रायनिवेदनेन तेषां निवृत्तिं च वक्तुमुपक्रमः—अये एतदित्यादिना । शार्ङ्गं विष्णुचापः ।

तन्विति । तनुमृदुललिताङ्गं कृशश्लक्ष्णकोमलावयवम् । अत एव स्त्रीस्वभावोपपन्नं स्त्रीस्वभावयुक्तम् । हरिकरधृतमध्यं व्यापारसमयेषु कृष्णपाणिगृहीतमध्यम् । शत्रुसङ्घैककालः शत्रुसमूहस्य मुख्यो मृत्युः । कनकखचितपृष्ठं कनकखचितं स्वर्णसंपृक्तं पृष्ठम् उपरिभागो यस्य तत् । एतेन विद्युल्लतासावर्ण्यं ध्वनितम् । चारु मनोहरम् । प्रकृतं शार्ङ्गं, नवसलिलदपार्श्वे नूतनमेघोपान्ते । विद्युल्लतेव विद्युत् तटित् लतेव वल्लीव दीर्घप्रसृतत्वाद् विद्युल्लता, उपमितसमासः, सेव । कृष्णस्य पार्श्वे भाति कृष्णस्य देहोपान्ते प्रकाशते । अर्थाद् व्यापारसमयेषु ॥ ४७ ॥

भो भोः! शार्ङ्ग! प्रशान्तरोषो भगवान् नारायणः । गम्यतां स्वनिलयमेव । हन्त निवृत्तः । यावद् गच्छामि । अये इयं कौमोदकी प्राप्ता ।

मणिकनकविचित्रा चित्रमालोत्तरीया सुररिपुगणगात्रध्वंसने जाततृष्णा ।
गिरिवरतटरूपा दुर्निवारातिवीर्या व्रजति नभसि शीघ्रं मेघबृन्दानुयात्रा ॥

हे कौमोदकि! प्रशान्तरोषो भगवान् नारायणः । हन्त निवृत्ता । यावद् गच्छामि । अये अयं पाञ्चजन्यः प्राप्तः ।

पूर्णेन्दुकुन्दकुमुदोदरहारगौरो नारायणाननसरोजकृतप्रसादः ।
यस्य स्वनं प्रलयसागरघोषतुल्यं गर्भा निशम्य निपतन्त्यसुराङ्गनानाम् ॥

हे पाञ्चजन्य! प्रशान्तरोषो भगवान् । गम्यतां स्वनिलयमेव । हन्त निवृत्तः । अये नन्दकासिः प्राप्तः ।

वनिताविग्रहो युद्धे महासुरभयङ्करः ।
प्रयाति गगने शीघ्रं महोल्केव विभात्ययम् ॥ ५० ॥

हे नन्दक! प्रशान्तरोषो भगवान् । गम्यतां स्वनिलयमेव । हन्त निवृत्तः । यावद् गच्छामि । अये एतानि भगवदायुधवराणि ।

भो भो इत्यादि । निवृत्तः कृष्णान्तिकगमनोद्यमान्निवृत्य स्थित इत्यर्थः । पुंस्त्वं शार्ङ्गाभिमानिदेवाभिप्रायम् । 'निवृत्तमि'ति वा पाठः ।

मणीत्यादि । मणिकनकविचित्रा रत्नैः स्वर्णैश्च अलङ्कारभूतैश्चित्रवर्णा । चित्रमालोत्तरीया चित्रा माला पुष्पस्रग् उत्तरीयं यस्याः सा । गिरिवरतटरूपा गिरिवरतटस्य पर्वतराजोत्सेधस्येव रूपम् आकृतिर्यस्याः सा । मेघबृन्दानुयात्रा मेघबृन्दम् अनुयात्रम् अनुगं यस्याः सा ॥ ४८ ॥

हे इत्यादि । पाञ्चजन्यः विष्णुशङ्खः ।

पूर्णेत्यादि । नारायणाननसरोजकृतप्रसादः श्रीकृष्णमुखपद्माध्मानानुगृहीतः ॥ ४९ ॥

हे पाञ्चजन्येत्यादि । नन्दकासिः नन्दकाख्यः खड्गः ।

वनितेत्यादि । वनिताविग्रहः स्त्रीरूपः । महोल्केव महती उल्का प्रज्वलिताग्रं काष्ठम् । तदिव ॥ ५० ॥

सोऽयं खड्गः खरांशोरपहसिततनुः स्वैः करैर्नन्दकाख्यः
सेयं कौमोदकी या सुररिपुकठिनोरःस्थलक्षोददक्षा ।
सैषा शार्ङ्गाभिधाना प्रलयघनरवज्यारवा चापयष्टिः
सोऽयं गम्भीरघोषः शशिकरविशदः शङ्खराट् पाञ्चजन्यः ॥५१॥

हे शार्ङ्ग ! कौमोदकि ! पाञ्चजन्य ! दैत्यान्तकृन्नन्दक ! शत्रुवहे ! ।
प्रशान्तरोषो भगवान् मुरारिः स्वस्थानमेवात्र हि गच्छ तावत् ॥ ५२ ॥

हन्त निवृत्ताः । यावद् गच्छामि । अये अत्युद्धूतो वायुः । अतितपत्यादित्यः । चलिताः पर्वताः । क्षुब्धाः सागराः । पतिता वृक्षाः । भ्रान्ता मेघाः । प्रलीना वासुकिप्रभृतयो भुजङ्गेश्वराः । किन्नुखल्विदम् । अये अयं भगवतो वरवाहनं गरुडः प्राप्तः ।

सुरासुराणां परिखेदलब्धं येनामृतं मातृविमोक्षणार्थम् ।
आच्छिन्नमासीद् द्विषतो मुरारेस्त्वामुद्वहामीति वरोऽपि दत्तः ॥ ५३ ॥

एवं निवर्तितानि स्वान्तिके सम्भूय स्थितानि सर्वाणि भगवदायुधान्युद्दिश्याह—सोऽयमित्यादि । स इति प्रसिद्धार्थे । खरांशोः सूर्यस्य । करैः अंशुभिः । चापयष्टिः धनुर्दण्डः । शङ्खराट् शङ्खराजः ॥ ५१ ॥

हे शार्ङ्गेत्यादि । दैत्यान्तकृत ! हे असुरनाशकर ! ॥ ५२ ॥

हन्तेत्यादि । अत्युद्धूतः अत्युत्कम्पितः । इदं वातात्युत्कम्पनसूर्यातितपनादिकम् । किन्नु खलु अज्ञातं, केन निमित्तेन संभूतमिति न ज्ञायत इत्यर्थः । अज्ञातार्थे किंशब्दः । अये इति स्मरणे । तच्च निमित्तविषयम् । प्राप्तः सन्निहितः । एवञ्च भगवत्कैङ्कर्याय सन्निधास्यतो गरुडस्य सकोपगतिवेगो वाय्वतिकम्पादेर्निमित्तमिति फलितम् ।

गरुडस्य प्रभावमाह — सुरेति । येन सुरासुराणां देवदैत्यानाम् । परिखेदलब्धं परिखेदेन समुद्रमथनायासेन लब्धम् । अमृतं, मातृविमोक्षणार्थं मातुः विनतायाः विमोक्षणार्थं सपत्नीमातृकद्रूदास्यान्मोचनाय । द्विषतः शत्रोरिन्द्रात् । आच्छिन्नं बलाद् गृहीतम् । आसीत् । 'त्वाम् उद्वहामि' इति एवंरूपः । वरोऽपि ईप्सितार्थोऽपि । मुरारेः उपेन्द्रस्य । संबन्धसामान्ये षष्ठी । दत्तः, आसीत् । स गरुड इति पूर्वेणान्वयः । अमृतहरणविष्णुवरदानकथा महाभारते आदिपर्वणि त्रयस्त्रिंशाध्यायेऽनुसन्धेया ॥ ५३ ॥

हे काश्यपप्रियसुत! गरुड! प्रशान्तरोषो भगवान् देवदेवेशः । गम्यतां स्वनिलयमेव । हन्त निवृत्तः । यावद् गच्छामि ।

एते [स्थिता वियति किन्नरयक्षसिद्धाः]
देवाश्च संभ्रमचलन्मकुटोत्तमाङ्गाः ।
रुष्टेऽच्युते विगतकान्तिगुणाः प्रशान्तं
श्रुत्वा श्रयन्ति सदनानि निवृत्ततापाः ॥ ५४ ॥

यावदहमपि कान्तां मेरुगुहामेव यास्यामि । (निष्क्रान्तः ।)

वासुदेवः — यावदहमपि पाण्डवशिबिरमेव यास्यामि ।

(नेपथ्ये)

नखलु नखलु गन्तव्यम् ।

वासुदेवः — अये वृद्धराजस्वर इव । भो राजन्! एष स्थितोऽस्मि ।

(ततः प्रविशति धृतराष्ट्रः ।)

धृतराष्ट्रः — क्वनुखलु भगवान् नारायणः । क्वनुखलु भगवान् पाण्डवश्रेयस्करः । क्वनुखलु भगवान् विप्रप्रियः । क्वनुखलु भगवान् देवकीनन्दनः ।

एत इत्यादि । सम्भ्रमचलन्मकुटोत्तमाङ्गाः सम्भ्रमेण भगवद्रूपदर्शनत्वरया चलन्मकुटानि चलत्किरीटानि उत्तमाङ्गानि शिरांसि येषां ते । विगतकान्तिगुणाः भगवद्रोषभयजनितादन्तस्तापान्निष्प्रभाः । प्रशान्तं विगतरोषम् । श्रुत्वा मद्वाक्यात् शार्ङ्गादीन् प्रति पूर्वं कथिताद् विज्ञायेत्यर्थः । इह प्रथमपादे तृतीयादीनामक्षराणां मातृकयोस्त्रुटितानां द्वादशानां स्थाने 'स्थिता' इत्यादीन्यक्षराण्यर्थानुगुण्यापेक्षयास्माभिः प्रतिनिहितानि ॥ ५४ ॥

यावदित्यादि । कान्तां रम्याम् ॥

अये इत्यादि । वृद्धराजस्वर इव वृद्धो राजा धृतराष्ट्रः तस्य स्वर इव । 'न खल्वि'त्यादिवाक्यं वृद्धराजेन व्याहृतमिति स्वरसंवादात् सम्भावयामीत्यर्थः । स्थितः गमनान्निवृत्तः ॥

क्वनुखल्वित्यादि । विप्रप्रियः ब्राह्मणप्रियः । क्वनुखल्वित्यसकृदुक्त्या भगवत्प्रसादनौत्सुक्यस्य परा काष्ठा व्यज्यते ।

मम पुत्रापराधात् तु शार्ङ्गपाणे! तवाधुना ।
एतन्मे त्रिदशाध्यक्ष! पादयोः पतितं शिरः ॥ ५५॥

(पतति)

वासुदेवः— हा धिक् । पतितोऽत्रभवान् । उत्तिष्ठोत्तिष्ठ ।

धृतराष्ट्रः—अनुगृहीतोऽस्मि । भगवन्! इदमर्घ्यं पाद्यं च प्रतिगृह्यताम् ।

वासुदेवः— सर्वं गृह्णामि । किं ते भूयः प्रियमुपहरामि ।

धृतराष्ट्रः— यदि मे भगवान् प्रसन्नः, किमतः परमिच्छामि ।

वासुदेवः— गच्छतु भवान् पुनर्दर्शनाय ।

धृतराष्ट्रः— यदाज्ञापयति भगवान् नारायणः । (निष्क्रान्तः)

(भरतवाक्यम्)

इमां सागरपर्यन्तां हिमवद्विन्ध्यकुण्डलाम् ।
महीमेकातपत्राङ्कां राजसिंहः प्रशास्तु नः ॥ ५६ ॥

(निष्क्रान्ताः सर्वे ।)

दूतवाक्यं समाप्तम् ।

शुभं भूयात् ।

ममेत्यादि । पुत्रापराधात्, स च बन्धनोद्यमरूपः, विश्वरूपदर्शनेऽपि कृष्णमाहात्म्याविश्वसनं वा । त्रिदशाध्यक्ष! देवेश! बन्धुवृद्धतया कृष्णं प्रति वन्द्यस्यापि धृतराष्ट्रस्य तत्पादयोः पतनं तस्मिन् सर्वलोकेश्वरत्वनिश्चयोदयान्नानुचितमिति बोद्धव्यम् ॥ ५५ ॥

हेत्यादि । हा धिगिति निन्दायाम् । पादपतनं गर्हितमित्यर्थः । बन्धुवृद्धतामभिसमीक्ष्येत्थमुक्तिः ॥

अन्वित्यादि । अनुगृहीतः स्थित्वाभिभाषणेन कृतार्थितः । पाद्यं पादप्रक्षालनार्थं तोयम ॥

सर्वमित्यादि । भूयः प्रियं बहुतरं प्रियम् ॥

गच्छत्वित्यादि । पुनर्दर्शनरूपमीप्सितं फलमुद्दिश्य सम्पति गमनमभ्यनुजानामीत्यर्थः ॥

यदित्यादि । यद् आज्ञापयति यत कर्तव्यत्वेनादिशति । तद् गमनमनुतिष्ठामीत्यार्थम् ॥

इत्थं कथावस्तु रूपकस्य परिसमापितम् । अस्य 'दूतवाक्यम्' इति संज्ञाया आनुगुण्यं पाण्डवदूतस्य श्रीकृष्णस्य वाक्यमत्र प्रधानमिति कृत्वा परिस्फुटमेव । रसस्तु वीरः, साम्नोपच्छन्दने परुषभाषणेन संक्षोभणे वा भगवता कृतेऽपि युद्धोत्साहस्य सुयोधनगतस्याविचाल्यस्य प्रतीतेः । अथवात्र रसो धर्मवीरः, अष्टादशाक्षौहिणीबलसमुदयस्य तदधिष्ठातॄणां पाण्डवकौरवाणां च क्षेमस्य परमधर्मभूतस्यार्थे भगवतात्मपरिभवमनादृत्य प्रयत्नस्य करणाद् भगवद्गतस्य धर्मोत्साहस्य स्थायिनः सर्वतः परिस्फूर्तेः ।

एतच्च रूपकं ख्यातेतिवृत्ततया सुयोधनरूपख्यातोद्धतनायकाश्रयतया वीराख्यदीप्तरसवत्तया एकाङ्कतया च "ख्यातेतिवृत्तो व्यायोगः ख्यातोद्धतनराश्रयः । हीनो गर्भविमर्शाभ्यां दीप्ताः स्युर्डिमवद् रसाः ॥ अस्त्रीनिमित्तसङ्ग्रामो जामदग्न्यजये यथा । एकाहचरितैकाङ्को व्यायोगो बहुभिर्नरैः ॥" (दशरूप० ३) इति धनिकोक्तव्यायोगलक्षणबहुंशयोगाद् व्यायोगव्यपदेशमर्हति । धर्मवीररसपक्षे नायकस्य श्रीकृष्णस्य धीरोदात्ततया मा भूदयं व्यायोगः, अपितु वीथीसंज्ञो रूपकभेदो वाच्यः । सा हि भरतेन लक्षिता "सर्वरसलक्षणाढ्या युक्ता ह्यङ्गैस्त्रयोदशभिः । वीथी स्यादेकाङ्का तथैकहार्या द्विहार्या वा ॥" इति । अत्र सर्वरसलक्षणाढ्येति रसविशेषनियमाभावो बोध्यते, न तु एकत्रैव सर्वरसयोगनियमः । द्विहार्येति च प्रधानपात्रद्वयप्रयोज्येत्यर्थः । एवञ्च कथञ्चिद् वीथीलक्षणयोगः स्पष्टः । वस्तुतस्तु भासरूपकाणां प्रचरन्नाट्यशास्त्रापेक्षया प्राचीनतायाः प्रतिमानाटकोपोद्घाते स्थापितत्वात् तेष्वर्वाचीनलक्षणान्यनुगमयितुं नातीव संरम्भः शोभत इति तत्त्वम् ॥

'प्रशस्तिः शुभशंसनम्' इत्युक्तलक्षणां प्रशस्तिं वक्ष्यन् तस्या अनुकार्यवाक्यत्वायोगादाह -- **भरतेति** । भरतस्य नटस्यानुकर्तुर्वाक्यम् भरतवाक्यम् ।

प्रशस्तिमाह — **इमामिति** । नः अस्माकं प्रजानां । राजसिंहः राजा सिंह इव शौर्यधैर्यादियोगाद् राजसिंहः, प्रशस्तगुणो राजेत्यर्थः । सागरपर्यन्तां सागराः समुद्राः पर्यन्ताः परितस्सीमाः यस्यास्तां । हिमवद्विन्ध्यकुण्डलां हिमवद्विन्ध्यौ आर्यावर्तस्य उत्तरदक्षिणसीमभूतौ पर्वतविशेषौ कुण्डले शोभाकरत्वात् कुण्डलस्थानीयौ यस्यास्तां । इमां महीं भूमिम् । स्त्रियमिति च रूपणं गम्यम् । एकातपत्राङ्कां प्रशास्तु, एकः अधिपत्यैकत्वाद् एक एव, न त्वनेकः आतपत्राङ्कः श्वेतच्छत्ररूपमधिपतिचिह्नं यस्यास्तां तथाभूतां प्रशास्तु, एकाधिपतिविशिष्टत्वाकारेण शासनविषयीकरोतु । अस्माकं राजा भारतभूमेरस्याः कृत्स्नायाः सार्वभौमो भूयादिति श्लोकपरमार्थः ॥ ५६ ॥

निष्क्रान्ताः सर्वे इति ग्रन्थपरिसमाप्तिः ॥

ताम्रपर्ण्यमृतार्द्रपूततरुवाग्रहारगतपाकिमा
वञ्चिमूलकरामवर्मकुलशेखरक्षितिपतिश्रितः ।
दूतवाक्यसमाख्यमूर्जितगुणाकरे गणपतिः सुधी-
र्भासनाटकमण्डले किमपि रूपकं विवृतवानिति ॥

वाग्देव्या वरिवस्यैव यदिदं मम जल्पितम् ।
भूयान्मय्येतया नित्यं सुप्रसन्ना सरस्वती ॥

इति श्रीमदनन्तशयनवास्तव्यस्य ताम्रपर्णीतीरवर्तितरुवाग्रहारा-
भिजनस्य श्रीसीताम्बारामसुब्रह्मण्यार्यसूनोः
महामहोपाध्यायगणपतिशास्त्रिणः कृतिषु
दूतवाक्यव्याख्यानं
सम्पूर्णम् ।

शुभं भूयात् ॥